# Shri Bodhayanamatadarshah

# શ્રીબોધાયનમતાદર્શઃ

## Document Information

Text title : Bodhayanamatadarshah

File name : bodhAyanamatAdarshaH.itx

Category : raama, rAmAnanda, upadesha, advice, major_works

Location : doc_raama

Author : pUrNAnandAchArya

Proofread by : Parashara Ranganathan

Latest update : January 23, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 23, 2024

*sanskritdocuments.org*

# શ્રીબોધાયનમતાદર્શઃ

અથ જગદ્ગુરુ શ્રીપૂર્ણાનન્દાચાર્ય સિદ્ધાન્તસાર્વભૌમ વિરચિતઃ
શ્રીબોધાયનમતાદર્શઃ ।
(પ્રમિતાક્ષરાવૃત્તિસારઃ સહસ્રશ્લોકી)
સ્વશતાબ્દીમહોત્સવે શ્રીપૂર્ણાનન્દાચાર્યોપદિષ્ટો વેદાન્તપ્રબન્ધઃ

રામં બોધાયનં નત્વા ચિદાનન્દં ગુરું તથા ।
બોધાયનમતાદર્શં કુર્વે સિદ્ધાન્તબુદ્ધયે ॥ ૧॥

યો બ્રહ્માણં વિદધાતિ ઇત્યેતચ્છ્રુતિમાનતઃ ।
રામો વિધિ વિધાયાદૌ તસ્મૈ વેદં હિ દત્તવાન્ ॥ ૨॥

પ્રધાનક્ષેત્રજ્ઞપતિર્ગુણેશ ઇતિ ચ શ્રુતૌ ।
પ્રધાનજીવબ્રહ્મેતિ તત્ત્વત્રયં સમીરિતમ્ ॥ ૩॥

અચેતનં પ્રધાનં હિ તત્ર ચ ત્રિગુણં જડમ્ ।
બ્રહ્મણાધિષ્ઠિતં તચ્ચ જગતઃ કારણં મતમ્ ॥ ૪॥

અજડશ્ચેતનો જીવો, જગદ્વ્યાપારવર્જિતઃ ।
અજડં ચેતનં બ્રહ્મ જગજ્જન્માદિકારણમ્ ॥ ૫॥

જીવશ્ચ પ્રકૃતિર્બ્રહ્મદેહત્વાદ્ધિ વિશેષણે ।
શરીરી ચોભયોર્બ્રહ્મ વિશિષ્ટં તદ્દ્વયેન ચ ॥ ૬॥

નનુ રામે શરીરિત્વાત્ ભોક્તૃતા સુખદુઃખયોઃ ।
ન હ વૈ સશરીરસ્ય પ્રમાણં ચાત્ર વર્ત્તતે ॥ ૭॥

મૈવં દુઃખાદિભોક્તૃત્વે શરીરિત્વં ન કારણમ્ ।
કિન્તુ પાપાદિવૈશિષ્ટ્યં ભૂપાલચૌરયોરિવ ॥ ૮॥

સૂક્ષ્માચિચ્ચિદ્વિશિષ્ટઃ શ્રીરામો બ્રહ્મ હિ કારણમ્ ।
સ્થૂલાચિચ્ચિદ્વિશિષ્ટસ્તુ કાર્યં બ્રહ્મ સ ભાષિતઃ ॥ ૯॥

દ્વયોર્વિશિષ્ટયોશ્ચાથ કાર્યકારણરામયોઃ ।
“સદેવ સોમ્યેદમગ્ર આસાદિતિશ્રુતૌ યતઃ ॥ ૧૦॥

ઐક્યમાપાદિતં તસ્માચ્છ્રીમદ્બોધાયનો મુનિઃ ।
મેને ચ સુમતં શ્રૌતં વિશિષ્ટાદ્વૈતસંજ્ઞકમ્ ॥ ૧૧॥

અખિલાઃ શ્રુતયો દ્વૈતે ચાદ્વૈતે સઙ્ગતા ન હિ ।
વિશિષ્ટાદ્વૈતવાદે તુ સર્વાસ્તાઃ સઙ્ગતિં ગતાઃ ॥ ૧૨॥

અદ્વૈતબોધિકાઃ કાશ્ચિત્ કાશ્ચિદ્ દ્વૈતાવબોધિકાઃ ।
ઘટકશ્રુતયઃ કાશ્ચિદન્તર્યામિપ્રબોધિકાઃ ॥ ૧૩॥

અપ્રામાણ્યં ભવેત્ તાસાં વિરોધેઽભિમતે મિથઃ ।
વિશિષ્ટાદ્વૈતિભિસ્તાસાં ક્રિયતેઽતઃ સમન્વયઃ ॥ ૧૪॥

અદ્વૈતશ્રુતયો બોધ્યા વિશિષ્ટબ્રહ્મબોધિકાઃ ।
નાન્યશ્રુતિમતાનાં હિ તત્વાનાં પ્રતિષેધિકાઃ ॥ ૧૫॥

પરં બ્રહ્મ ચ તદ્વાચ્યં ત્વદ્વાચ્યં ત્વચ્છરીરકમ્ ।
તત્ત્વમસીતિવાક્યેન તૂક્તોઽભેદસ્તયોર્દ્વયોઃ ॥ ૧૬॥

દ્વૈતશ્રુતિસમૂહસ્તુ વિદ્વદ્ભિઃ સમ્મતઃ ખલુ ।
ચિદચિદીશતત્ત્વાનાં પાર્થક્યેનાવબોધકઃ ॥ ૧૭॥

આત્મત્વમીશ્વરસ્યાથ ચિદચિતોશ્ચ દેહતા ।
સર્વાભિર્વિનિવેદ્યેતે ઘટકશ્રુતિભિઃ કિલ ॥ ૧૮॥

વેદાન્તતત્ત્વવિદ્ભિશ્ચ કાર્યકારણભેદતઃ ।
ચિદચિદ્ભ્યાં વિશિષ્ટં તુ બ્રહ્મ ચ દ્વિવિધં મતમ્ ॥ ૧૯॥

સ્થૂલાચિચ્ચિદ્વિશિષ્ટં હિ બ્રહ્મકાર્યં પ્રકીર્ત્તિતમ્ ।
સૂક્ષ્માચિચ્ચિદ્વિશિષ્ટં તુ બ્રહ્મ કારણમુચ્યતે ॥ ૨૦॥

અદ્વૈતં મન્યતે પ્રાજ્ઞૈર્બ્રહ્મણોશ્ચ વિશિષ્ટયોઃ ।
વિશિષ્ટાદ્વૈતસિદ્ધાન્તસ્તસ્માચ્છ્રુત્યનુમોદિતઃ ॥ ૨૧॥

અત એવાસ્મદાચાર્યબોધાયનાદિસમ્મતઃ ।
વિશિષ્ટાદ્વૈતસિદ્ધાન્તો લોકે વિજયતેતરામ્ ॥ ૨૨॥

સર્વાસાં ચ શ્રુતીનાં હિ શ્રુતાનન્દેન ધીમતા ।
એવં સમન્વયઃ પ્રોક્તઃ સર્વશ્રુતિસમન્વયે ॥ ૨૩॥

ઈશ્વરઃ

અનિત્યફલકં કર્મ શ્રુત્યા જ્ઞાત્વા મુમુક્ષુભિઃ ।
યન્નિત્યફલકં તદ્ધિ કર્ત્તવ્યં બ્રહ્મવેદનમ્ ॥ ૨૪॥

જગજ્જન્માન્દિહેતુશ્ચ બ્રહ્મ વેદાન્તબોધિતમ્ ।
બહુ સ્યામિ તિસઙ્કલ્પકારકો જાનકીશ્વરઃ ॥ ૨૫॥

જગત્સૃષ્ટ્યાદિકર્ત્તા શ્રીરામો બ્રહ્મ પરાત્પરમ્ ।
શ્રીબોધાયનગીતાયામિતિ રામસ્ય બ્રહ્મતા ॥ ૨૬॥

દૃશ્યમાનં જગત્ સર્વં ચેતનાચેતનાત્મકમ્ ।
અદૃશ્યરૂપતાં પ્રાપ્ય શ્રીરામે કારણે સ્થિતમ્ ॥ ૨૭॥

અક્ષરં લીયતે તાવત્ તમસીતિ શ્રુત્તૌ મતમ્ ।
તમશ્ચ લીયતે રામે શ્રીરામો ન ચ કુત્રચિત્ ॥ ૨૮॥

રામાત્ પરતરં તત્ત્વં નાન્યદસ્તિ હિ કિઞ્ચન ।
સર્વસ્ય પ્રભવો રામો રામાત્ સર્વમિદં જગત્ ॥ ૨૯॥

નામરૂપક્રિયોભિશ્ચ રામે સર્વં પ્રતિષ્ઠિતમ્ ।
દૃશ્યત્વેનોત્થિતં સર્વં રામાત્ કાષ્ઠાદ્ યથાઽનલઃ ॥ ૩૦॥

ઘટવતી ધરા પૂર્વં ઘટશૂન્યા પ્રતીયતે ।
પશ્ચાદ્ ઘટેન યુક્તા સા સવિશેષાઽનુભૂયતે ॥ ૩૧॥

તથા વિકલ્પશૂન્યોઽપિ સવિકલ્પો હિ રાઘવઃ ।
સર્વાવસ્થાસ્થિતસ્યાસ્ય હ્યાધારશ્ચાખિલસ્ય સઃ ॥ ૩૨॥

સવિકલ્પાવિકલ્પત્વે ઈક્ષણીયે ચ રાઘવે ।
વીક્ષ્યતે વટવીજે યદ્ વટો નાપિ હિ વીક્ષ્યતે ॥ ૩૩॥

અવ્યક્તં કારણે રામે સર્વં કાર્યે ચ વ્યજ્યતે ।
તથા ન સકલં રામઃ સર્વમેવ ચ રાઘવઃ ॥ ૩૪॥

સર્વાધારતયા શ્રીમદરામશ્ચૈકોઽદ્વયઃ પરઃ ।
તદેકાયનતો રામઃ સર્વં નૈવાત્ર સંશયઃ ॥ ૩૫॥

ઉપાદાનં નિમિત્તં ચ સર્વસ્યૈકો હિ રાઘવઃ ।
ઊર્ણનાભિર્યથા તન્તોર્મન્યતે કારણદ્વયમ્ ॥ ૩૬॥

ઉપાદાનત્વમેતસ્ય વિશ્વસ્ય બ્રહ્મણિ કિલ ।
સદેવ સોમ્યેદમગ્ર ઇત્યાદિશ્રુતિસમ્મતમ્ ॥ ૩૭॥

ન બ્રહ્મા નાઽપિ વિષ્ણુશ્ચ નો તદાસીન્મહેશ્વરઃ ।
તદાસીદ્ ભગવાન્ રામઃ સૂક્ષ્મચિદચિચ્છરીરકઃ ॥ ૩૮॥

ઉપાદાનતયા રામે વિકારઃ સમ્ભવેન્નનુ ।
મૈવં વિશિષ્ટરામસ્ય મતઃ સ ચ પ્રકારયોઃ ॥ ૩૯॥

સ્વભાવે ચ સ્વરૂપે ચ વિકારઃ પ્રકૃતેઃ ખલુ ।
વિકારઃ સોઽથ જીવસ્ય સ્વભાવ એવ મન્યતે ॥ ૪૦॥

વિશેષ્યબ્રહ્મણઃ સોઽથ ન સ્વરૂપસ્વભાવયોઃ ।
બ્રહ્મોપાદાનતાવાદિશ્રુતિકોપોઽપિ નો ભવેત્ ॥ ૪૧॥

સાઙ્ખ્યાસ્તુ જગતો હેતું મન્યન્તે પ્રકૃતિં કિલ ।
સુખદુઃખાત્મકં ચાથ મોહાત્મકં જગદ્ યતઃ ॥ ૪૨॥

વર્ત્તતે ચ જગત્ તસ્માત્ સત્વાદિત્રિગુણાત્મકમ્ ।
પ્રધાનં ત્રિગુણં તસ્માદુપાદાનં ચ તસ્ય હિ ॥ ૪૩॥

મૃદાત્મકઘટસ્યાત્રોપાદાનં ચ મૃદેવ હિ ।
સદ્વાચ્યપ્રકૃતિજ્ઞાનાદ્ વિશ્વજ્ઞાનં ભવેદપિ ॥ ૪૪॥

ઇતિ ચેદ્ યુક્તતા નાસ્ય રચનાનુપપત્તિતઃ।
અચેતનપ્રધાનસ્યોપાદાનાવગમઃ કથમ્ ॥ ૪૫॥

વૈષમ્યં ચ કથં સૃષ્ટેઃ કર્માજ્ઞાનાચ્ચ દેહિનામ્ ।
રજઃસત્વસુયોગાચ્ચ ક્રિયાજ્ઞાનોભયં ન હિ ॥ ૪૬॥

ચેતન એવ તદ્યોગાત્ ક્રિયાજ્ઞાનદ્વયં યતઃ ।
અચિજ્જ્ઞાનાત્ કથં જ્ઞાતં ભવેચ્ચિદચિદાત્મકમ્ ॥ ૪૭॥

નાચેતનં જગત્ કિન્તુ ચેતનાચેતનત્મકમ્ ।
અચેતનં પ્રધાનં સ્યાચ્ચેતનકારણં કથમ્ ॥ ૪૮॥

કથં નુ ચેતનં બ્રહ્માચેતનકારણં ભવેત્ ।
મૈવં ચિતાઽચિતા યસ્માદ્ વિશિષ્ટં બ્રહ્મ સમ્મતમ્ ॥ ૪૯॥

ઉપાદાનં મતં બ્રહ્મ ચિદચિદ્દ્વારકં યતઃ ।
પ્રકારાંશે વિકારસ્તદ્ બ્રહ્મણો નિર્વિકારતા ॥ ૫૦॥

ચેતનેનાનધિષ્ઠાને પ્રવૃત્તિઃ પ્રકૃતૌ કથમ્ ।
દધિસ્વરૂપતાં યાતિ ચેશ્વરાધિષ્ઠિતં પયઃ ॥ ૫૧॥

સર્વસ્યેશનિયન્તૃત્વં યોઽપ્સ્વાદિકશ્રુતૌ શ્રુતમ્ ।
અચેતનગુણાનાં તુ મિથશ્ચાઙ્ગાઙ્ગિતા કથમ્ ॥ ૫૨॥

પુરુષસન્નિધૌ ચેત્ સા તદાસ્યાત્ સૃષ્ટિનિત્યતા ।
પુંસઃ પ્રવર્ત્તકત્વે તસ્યૌદાસીન્યં ન સમ્ભવેત્ ॥ ૫૩॥

ન સ્યાત્ સામ્યદશા તેષા ગુણાનાં ચ સ્વતઃ ચ્યુતૌ ।
તદાનીમિતરાભાવાચ્ચેતરસ્માન્ન સા ચ્યુતિઃ ॥ ૫૪॥

શ્રુતં સર્વત્ર વેદાન્તે જગતો બ્રહ્મ કારણમ્ ।
સદવાચ્યે લીયતે ચાત્મા સદ્વાચ્યા પ્રકૃતિર્ન તત્ ॥ ૫૫॥

તદૈક્ષતે તિ સદ્વાચ્ય ઈક્ષણં હિ યતઃ શ્રુતમ્ ।
સદ્વાચ્યા પ્રકૃતિસ્તસ્માદીક્ષણાભાવતો ન હિ ॥ ૫૬॥

ચેતનસ્ય હિ ધર્મસ્ય સર્વસમ્મતમીક્ષણમ્ ।
કદાચિચ્ચ કથઞ્ચિન્ન પ્રકૃતૌ તસ્ય સમ્ભવઃ ॥ ૫૭॥

તેજસ્યચેતને ચાપિ તત્તેજ ઐક્ષત ઇતિ ।
ઈક્ષણં ચ શ્રુતં ગૌણં પ્રકૃતૌ તદ્વદેવ નુ ॥ ૫૮॥

મૈવમુત્તરવાક્યેષુ ચાત્મશબ્દઃ શ્રુતો યતઃ ।
સ ચેતનસ્તતસ્તસ્ય ચેક્ષણં મુખ્યમેવ હિ ॥ ૫૯॥

તેત્તેજ ઐક્ષત ચાદાવન્તર્યામિણ ઈક્ષણમ્ ।
મુખ્યમેવ તુ તચ્ચાપિ તેજોઽન્તસ્થો હિ ચેતનઃ ॥ ૬૦॥

સચ્છબ્દવાચ્યનિષ્ઠસ્ય મોક્ષસ્ય ચોપદેશતઃ ।
જગદ્ધેતુઃ પરબ્રહ્મ સદ્વાચ્યં પ્રકૃતિર્ન હિ ॥ ૬૧॥

વદન્તિ સૃષ્ટિચર્ચાયાં વૈશેષિકાનુયાયિનઃ ।
ક્ષિત્યમ્બેજઃ સમીરાણાં હેતવઃ પરમાણવઃ ॥ ૬૨॥

ન રમ્યં કથનં તેષાં વિકલ્પાસહતા યતઃ ।
સાવયવા ન વા તૈશ્ચ સ્વીકૃતાઃ પરમાણવઃ ॥ ૬૩॥

તેષામવયવાનાં ચ તથાભૂતેઽનવસ્થિતિઃ ।

આદ્યઃ પક્ષો ન તદ્ રમ્યઃ સમીચીનો ન ચાન્તિમઃ ॥ ૬૪॥

તેષામવયવાભાવે સંયોગો ન ભવેન્મિથઃ ।
અંશં વિના તુ સંયોગઃ કથઞ્ચિત્ સમ્ભવેન્ન હિ ॥ ૬૫॥

અન્યથા ચૈકદેશસ્થૈઃ સ્વાધિકદેશવર્ત્તિનઃ ।
ન સ્યાત્ કાર્યસ્ય ચારમ્ભઃ તૈઃ પરમાણુભિઃ ખલુ ॥ ૬૬॥

નાસ્પૃષ્ટેઽવયવૈર્દેશે દૃષ્ટાઽવયવિનઃ સ્થિતિઃ ।
દિગ્ભેદાત્ પરમાણૂનાં સ્યાત્ સાવયવતૈવ ચ ॥ ૬૭॥

તન્મતે પરમાણૂનાં સ્પન્દે સંયોગહેતુતા ।
સ્પન્દકારણતા ચાથ જીવાદૃષ્ટે હિ મન્યતે ॥ ૬૮॥

સમવેતમદૃષ્ટં તજ્જીવે નો પરમાણુષુ ।
સ્પન્દે હિ પરમાણૂનાં કથઞ્ચિત્ કારણં ન તત્ ॥ ૬૯॥

અન્યાદૃષ્ટમન્યથા સ્યાદ્ હેતુરન્યસુખાદિકે ।
અદૃષ્ટે પરમાણુસ્થે સૃષ્ટિશ્ચ સર્વદા ભવેત્ ॥ ૭૦॥

ક્ષણિકાન્ પરમાણૂંશ્ચ ક્ષિત્યાદીનાં હિ સૌગતાઃ ।
ઉપાદાનં વદન્ત્યત્ર બાહ્યાર્થાસ્તિત્વવાદિનઃ ॥ ૭૧॥

ક્ષિત્યાદયઃ પ્રજાયન્તે સંહિતૈઃ પરમાણુભિઃ ।
હેતુત્વે પરમાણૂનાં પ્રોક્તૈર્દોષૈર્વરં ન તત્ ॥ ૭૨॥

સંહિતાશ્ચ કથઙ્કારં ક્ષણિકાઃ પરમાણવઃ ।
વિજ્ઞાનવિષયત્વં ચ ક્ષણિકેષુ ન સમ્ભવેત્ ॥ ૭૩॥

બાહ્યાર્થાનાં પ્રકાશાય જ્ઞાનઞ્ચાભ્યુપગમ્યતે ।
બાહ્યાર્થાસ્તુ તતશ્ચૈવ યોગાચારો ન મન્યતે ॥ ૭૪॥

જ્ઞાનસ્ય પરિણામા હિ બાહ્યાર્થાસ્તેન સમ્મતાઃ ।
પ્રકાશતે હિ સાકારો નિરાકારો ન કર્હિચિત્ ॥ ૭૫॥

જ્ઞાનસત્ત્વે ચ બાહ્યાર્થા જ્ઞાનાભાવે હિ નો તતઃ ।
વિજ્ઞાનમેવ મન્તવ્યં બાહ્યાર્થાસ્તુ કદાપિ ન ॥ ૭૬॥

મૈવં યતશ્ચ બાહ્યાર્થો જ્ઞાનાદ્ ભિન્નઃ પ્રતીયતે ।
ઘટાચ્ચ ઘટવિજ્ઞાનં ભિન્નં સર્વસ્ય સમ્મતમ્ ॥ ૭૭॥

જૈનૈર્મતા ઉપાદાનહેતવઃ પરમાણવઃ ।
તેભ્યશ્ચૈકસ્વભાવેભ્યો જાયન્તે ચ ધરાદયઃ ॥ ૭૮॥

ક્ષિત્યાદેશ્ચ મિથો ભેદઃ પરિણામકૃતો મતઃ ।
મૈવં નો ચેદ્ધિ મૃત્પિણ્ડાજ્જાયતાં ઘટવત્ પટઃ ॥ ૭૯॥

હેતુત્વે પરમાણૂનાં દોષાઃ પૂર્વં સમીરિતાઃ ।
મતોપાદાનતા તન્ન વૈદિકૈઃ પરમાણુષુ ॥ ૮૦॥

કૈશ્ચિત્ ત્વિહ યથા શુક્તાવધ્યસ્તં રજતં ખલુ ।
જગદેતત્ તથાઽધ્યસ્તં બ્રહ્મણ્યવિદ્યયા મતમ્ ॥ ૮૧॥

તદયુક્તં યતોઽવિદ્યાઽઽશ્રયસ્યાત્ર ન સમ્ભવઃ ।
પરસ્પરાશ્રયો દોષો જીવે તદાશ્રયે મતે ॥ ૮૨॥

પરસ્પરવિરોધાચ્ચ નૈવ બ્રહ્મ તદાશ્રયઃ ।
આશ્રયાનુપપત્તેશ્ચાવિદ્યાસિદ્ધિર્ભવેન્ન તત્ ॥ ૮૩॥

જન્માદ્યસ્ય યતશ્ચૈવં વ્યાસેન સૂત્રિતં તતઃ ।
ન તેન સૂત્રિતં તસ્માદ વ્યાસો જગતો યતઃ ॥ ૮૪॥

પરિણામાત્ તુ સૂત્રેણ મતા પરિણામિહેતુતા ।
હેતુતા બ્રહ્મણસ્તસ્માદ્ વિવર્ત્તવિધયા ને હિ ॥ ૮૫॥

ઉપાદાનં નિમિત્તં ચ જગતો રાઘવો મતઃ ।
શ્રુતયો નિર્વિકારત્વં વદન્તિ બ્રહ્મણો નનુ ॥ ૮૬॥

વ્યકુપ્યેયુર્હિ તાશ્ચૈવં કુતશ્ચેદુચ્યતે યતઃ ।
વિકારીતિ મતં સર્વૈરુપાદાનં વિચક્ષણૈઃ ॥ ૮૭॥

ઇતિ ચેદુચ્યતે હ્યત્ર નૈવં વાચ્યં કુતો યતઃ ।
પ્રતિજ્ઞાતં શ્રુતૌ સર્વજ્ઞાનમેકસ્ય જ્ઞાનતઃ ॥ ૮૮॥

દૃષ્ટાન્તઃ કથિતશ્ચાપિ મૃત્કાર્યાણાં મૃદસ્તથા ।
ઉપાદાનં ઘટાદેર્હિ મૃત્તિકા પરિકીર્તિતા ॥ ૮૯॥

પરિણતા યતો મૃદ્ધિ ઘટાદિરૂપતઃ ખલુ ।
ઉપાદાનસ્ય વિજ્ઞાનાદુપાદેયાવબોધતઃ ॥ ૯૦॥

મૃજ્જ્ઞાનેન ઘટાદીનાં વિજ્ઞાનં સમ્મતં યથા ।
એકસ્ય બ્રહ્મણો જ્ઞાનાદ્ વિજ્ઞાનં જગતસ્તથા ॥ ૯૧॥

ઉપાદાનં યતો બ્રહ્મ જગતોઽસ્ય મતં બુધૈઃ ।
પરિણતં યતો બ્રહ્મ જગદ્રૂપેણ સમ્મતમ્ ॥ ૯૨॥

વ્યાસેન “પ્રકૃતિશ્ચે” ત્યાદિકં હિ સૂત્રિતં તતઃ ।
શ્રીબોધાયનવૃત્તૌ તદ્ વ્યખ્યાતમેવમેવ ચ ॥ ૯૩॥

બ્રહ્મણઃ પરિણામો હિ પ્રકારદ્વારકો જગત્ ।
વિકારિત્વં તતો દ્વારે પ્રકૃતિપુરુષદ્વયે ॥ ૯૪॥

સ્વરૂપે ચ સ્વભાવે ચ વિકારઃ પ્રકૃતેઃ ખલુ ।
સ્વભાવ એવ જીવસ્ય વિકારઃ સ્વીકૃતો બુધૈઃ ॥ ૯૫॥

બ્રહ્મણસ્તુ વિકારો યન્ન સ્વરૂપસ્વભાવયોઃ ।
વ્યાકોપાવસરઃ કશ્ચિચ્છ્રુતીનાં વર્ત્તતે ન તત્ ॥ ૯૬॥

પરિણામવિમર્શે હિ દ્વારાનન્દાર્યનિર્મિતે ।
ઇત્યેવં પરિણામો હિ વિમૃષ્ટો બ્રહ્મણઃ સતઃ ॥ ૯૭॥

ઈશે સૃષ્ટિનિમિત્તત્ત્વે નૈર્ઘૃણ્યં ચ ભવેન્નનુ ।
મૈવં યદ્ દૈવસાપેક્ષા સૃષ્ટિદોષસ્તતશ્ચ ન ॥ ૯૮॥

તતો વૈષમ્યનૈર્ઘૃણ્યે ઇત્યેવમાદિરૂપતઃ ।
ભગવતા હિ વ્યાસેન સૂત્રિતં બ્રહ્મદર્શને ॥ ૯૯॥

શ્રીપુરુષોત્તમાર્યેણ બોધાયનમહર્ષિણા ।
બોધાયનમહાવૃત્તૌ વ્યખ્યાતઞ્ચૈવમેવ તત્ ॥ ૧૦૦॥

અસ્મદ્ગુરુગુરોઃ શ્રૌતસિદ્ધાન્તવિન્દુનામકે ।
પ્રબન્ધે ખણ્ડિતા ચૈષા શઙ્કા ચૈવમેવ હિ ॥ ૧૦૧॥

ઈશસ્ય ચાનિમિત્તત્ત્વે વિરોધ ઈક્ષણશ્રુતેઃ ।
ઉભયકારણત્વં તત્ સિદ્ધાન્તે બ્રહ્મણો મતમ્ ॥ ૧૦૨॥

સિદ્ધ્યેચ્ચૈકસ્ય વિજ્ઞાનાત્ સર્વસ્ય જ્ઞાતતઽપિ ચ ।
પ્રકૃતિશ્ચ પ્રતિજ્ઞે ત્યાદિકં હિ સૂત્રિતં તતઃ ॥ ૧૦૩॥

ઇતિ ચેત્ સાવધાનેન શ્રૂયતામુચ્યતે મયા ।
એક વિજ્ઞાનતઃ સર્વવિજ્ઞાનં સમ્મતં શ્રુતૌ ॥ ૧૦૪॥

અદ્વૈતિનાં મતે તદ્ધિ કથઞ્ચિન્નોપપદ્યતે ।

બ્રહ્મૈવ તન્મતે સત્યં મિથ્યા બ્રહ્મેતરદ્ યતઃ ॥ ૧૦૫॥

શુક્તૌ રજતવદ્ ભાતિ બ્રહ્મણ્યારોપિતં જગત્ ।
જ્ઞાતે બ્રહ્મણ્યધિષ્ઠાને ન ભાતિ શુક્તિરૌપ્યવત્ ॥ ૧૦૬॥

સત્યં ચ કારણં બ્રહ્મ મૃત્તિકાસદૃશં ખલુ ।
કાર્યભૂતં જગન્મિથ્યા મૃદ્વિકારઘટાદિવત્ ॥ ૧૦૭॥

કાર્યં બુદ્ધં ભવેદત્રોપાદાનસ્ય ચ બોધતઃ ।
સત્યત્વમુભયોર્યદ્વા મિથ્યાત્વં સમ્ભવેદ્ યદિ ॥ ૧૦૮॥

બ્રહ્મજ્ઞાનાજ્જગજ્જ્ઞાનમત્ર સ્યાન્ન કદાચન ।
બ્રહ્મણઃ સત્યતા ચાથ મિથ્યાત્વં જગતશ્ચ યત્ ॥ ૧૦૯॥

વેદાન્તાચ્ચ વિરુદ્ધં તદદ્વૈતિનાં મતં તતઃ ।
દોષો ન સમ્ભવત્યેષ વિશિષ્ટાદ્વૈતિનાં મતે ॥ ૧૧૦॥

ક્ષરં પ્રધાનમિત્યાદિશ્રુતૌ તત્ત્વત્રયં શ્રુતમ્ ।
પ્રધાનં ક્ષરમિત્યેકં દ્વિતીયમમૃતાક્ષરમ્ ॥ ૧૧૧॥

ઉક્તોભયોર્નિયન્તા હિ તૃતીયં તત્ત્વમુચ્યતે ।
યસ્યાત્મા યસ્ય પૃથિવી ઇત્યેવં ચિદચિત્તથા ॥ ૧૧૨॥

ઈશસ્ય દેહરૂપત્વાત્ પ્રકારૌ સમ્મતાવુભૌ ।
ઉભાભ્યાં ચ વિશિષ્ટો હિ સર્વેશો રઘુનાયકઃ ॥ ૧૧૩॥

ચિદચિદ્ભ્યાં ચ સૂક્ષ્માભ્યાં વિશિષ્ટઃ પ્રલયે હિ સઃ ।
ઉપાદાનં હિ વિશ્વસ્ય સર્વેશો રાઘવો મતઃ ॥ ૧૧૪॥

સદેવ સોમ્યેદમગ્ર શ્રુતેસ્તત્ર પ્રમાણતા ।
અદ્વિતીયમિત્યુક્તેશ્ચ નિમિત્તં ચ સ એવ હિ ॥ ૧૧૫॥

સ્થૂલાભ્યાં ચિદચિદ્ભ્યાં ચ વિશિષ્ટે તત્ર કાર્યતા ।
બહુત્વાવસ્થયા યુક્તસ્તદા રામઃ પ્રકીર્ત્તિતઃ ॥ ૧૧૬॥

સૂક્ષ્માચિચ્ચિદ્વિશિષ્ટં તદ્ બ્રહ્મ કારણમુચ્યતે ।
સ્થૂલાચિચ્ચિદ્વિશિષ્ટં ચ બ્રહ્મ કાર્યં મતં બુધૈઃ ॥ ૧૧૭॥

એતયોર્બ્રહ્મણોરૈક્યં વિશિષ્ટાદ્વૈતમુચ્યતે ।
કારણબ્રહ્મબોધાચ્ચ કાર્યં બ્રહ્મ હિ બુધ્યતે ॥ ૧૧૮॥

વિકારો જાયતે ચાથ ચિદચિતોઃ પ્રકારયોઃ ।
અક્ષતા ચ ભવેત્ તસ્માદ્ બ્રહ્મણો નિર્વિકારતા ॥ ૧૧૯॥

ચિદચિદ્ભ્યાં વિશિષ્ટત્વાત્ સઙ્કલ્પવત્તયા તથા ।
ઉપાદાનં નિમિત્તં ચ સદ્ બ્રહ્મૈવોર્ણનાભિવત્ ॥ ૧૨૦॥

તદૈક્ષતેતિસઙ્કલ્પાદ્ ગુણેવૈશિષ્ટ્યહેતુતઃ ।
બ્રહ્મણઃ સવિશેષત્વં સાધિતં ચ ભવેદપિ ॥ ૧૨૧॥

એવં સમીરિતં ચાપિ શ્રુતાનન્દેન ધીમતા ।
રામસ્યોભયહેતુત્વમુપેયોપાયવર્ણને ॥ ૧૨૨॥

કાર્યસ્ય બ્રહ્મણો હેતુઃ કારણં બ્રહ્મ સમ્મતમ્ ।
પરિણામાદિતિસૂત્રં સઙ્ગતં ચ ભવેત્ તતઃ ॥ ૧૨૩॥

સઙ્ગતિર્નાસ્ય સૂત્રસ્ય વિદર્ત્તવાદિનાં મતે ।
વિવર્ત્તઃ પરિણામો ન દુગ્ધસ્ય દધિવદ્ યતઃ ॥ ૧૨૪॥

નાકલ્પં મુચ્યતે જીવો બદ્ધશ્ચ પ્રાકૃતૈર્ગુણૈઃ ।
શ્રીરામં ચ પ્રપન્નઃ સ મુચ્યતે નિર્ગુણશ્ચ સન્ ॥ ૧૨૫॥

સ તિષ્ઠતિ પ્રકારઃ સન્ સ્વાધારે પરમાત્મનિ ।
રામ એવાચિદંશોઽપિ પ્રકારઃ સન્ હિ તિષ્ઠતિ ॥ ૧૨૬॥

શ્રીરામે તુ લયે ચોભૌ તિષ્ઠતઃ સૂક્ષ્મરૂપતઃ ।
અભાવૌ ન હિ વિદ્યેતે પ્રલયે ચોભયોસ્તયોઃ ॥ ૧૨૭॥

પ્રલયઃ પ્રોચ્યતે પ્રાજ્ઞૈરવ્યક્તત્વેન સંસ્થિતિઃ ।
વિદ્વદ્ભિરુચ્યતે વ્યક્તં સ્થૂલભાવેન તૂદ્ગમઃ ॥ ૧૨૮॥

ભોક્તૃભોગ્યતયા ચાથ શરીરાત્મતયા ખલુ ।
અચિચ્ચિદાખ્યતત્ત્વે ચ વિભિન્ને પરમાત્મનઃ ॥ ૧૨૯॥

શ્રીરામપરતન્ત્રે તે સ્વતન્ત્રો રાઘવસ્તથા ।
પ્રકારત્વાદભિન્ને તે શ્રીરામાન્ન સ્વરૂપતઃ ॥ ૧૩૦॥

ચિદચિતોઃ પ્રકારત્વે સમ્બન્ધશ્ચાપૃથક્સ્થિતિઃ ।
તેન તાભ્યાં વિશિષ્ટઃ શ્રીરામઃ સર્વેશ્વરો મતઃ ॥ ૧૩૧॥

બ્રહ્મસત્ત્વે પ્રમાણં ચ શાસ્ત્રમેવ સુનિશ્ચિતમ્ ।
તન્ત્વૌપનિષદઞ્ચૈતચ્છ્રુતિવાક્યપ્રમાણતઃ ॥ ૧૩૨॥

કાર્યત્વાત્ કૃતિજન્યં નુ વિશ્વં ક્ષિત્યઙ્કુરાદિકમ્ ।
ઘટવચ્ચાનુમાનેન વિશ્વેઽસ્તિ કૃતિજન્યતા ॥ ૧૩૩॥

તાદૃશકૃતિશાલિત્વમસ્માકં સમ્ભવેન્ન તત્ ।
તાદૃશક્કૃતિમત્ત્વેન સિદ્ધો રામોઽખિલેશ્વરઃ ॥ ૧૩૪॥

મૈવં ન ગૃહ્યતે યસ્માદ્ વ્યાપ્તિઃ સાધનસાધ્યયોઃ ।
ઈશસ્ય તત્કૃતેશ્ચાપિ યસ્માદધ્યક્ષતા ન હિ ॥ ૧૩૫॥

તન્ત્વૌપનિષદં ચૈવં બ્રહ્મણઃ શાસ્ત્રવેદ્યતા ।
સૂત્રં ચ શાસ્ત્રયોનિત્વાત્ તતો વ્યાસેન સૂત્રિતમ્ ॥ ૧૩૬॥

વૃદ્ધાસકૃત્ પ્રયોગાદ્ધિ બાલો વેત્તિ મુખાદિકમ્ ।
ઉપાસનેઽન્વિતં સિદ્ધં બ્રહ્મ શ્રુત્યા ચ બોધ્યતે ॥ ૧૩૭॥

વેદાન્તિનઃ પ્રભાષન્તે વેદાન્તા બ્રહ્મવાચકાઃ ।
પ્રમાણં વર્ત્તતે તત્ર તન્ત્વૌપનિષદં શ્રુતિઃ ॥ ૧૩૮॥

પ્રાભાકરા ન મન્યન્તે વેદાન્તિનામિદં વચઃ ।
કસ્માચ્ચેદુચ્યતે યસ્માત્ કાર્યતા બ્રહ્મણો ન હિ ॥ ૧૩૯॥

સર્વે શબ્દાશ્ચ વર્ત્તન્તે કાર્યાર્થપ્રતિપાદકાઃ ।
શબ્દાનાં નાસ્તિ તાત્પર્યં સિદ્ધાર્થપ્રતિપાદને ॥ ૧૪૦॥

સિદ્ધકાર્યવિભેદાદ્ધિ દ્વિધા ચાર્થાઃ સમીરિતાઃ ।
યત્નાસાધ્યાઃ પદાર્થાસ્તુ સિદ્ધાર્થાઃ સમુદીરિતાઃ ॥ ૧૪૧॥

ઘટોઽસ્તીત્યાદિવાક્યેષુ સિદ્ધાર્થા હિ ઘટાદયઃ ।
ભવત્યત્ર ન વ્યુત્પત્તિસ્તેષામાકર્ણનાત્ ખલુ ॥ ૧૪૨॥

યત્નસાધ્યાઃ પદાર્થાસ્તુ કાર્યભૂતા હિ સમ્મતાઃ ।
કાર્યભૂતા મતાઃ પ્રાજ્ઞૈઃ ક્રિયાશ્ચ ગમનાદયઃ ॥ ૧૪૩॥

કાર્યે તાત્પર્યવન્તો હિ શબ્દા લૌકિકવૈદિકાઃ ।
શબ્દો હિ યત્પરશ્ચાસ્તિ શબ્દાર્થઃ સ ચ એવ હિ ॥ ૧૪૪॥

કાર્યમેવ હિ શબ્દાર્થસ્તત એવ હિ મન્યતે ।
સિદ્ધાર્થો ન તુ શબ્દાર્થો યત્નસાધ્યો યતો ન સઃ ॥ ૧૪૫॥

નિત્યસિદ્ધં પરબ્રહ્મ યત્નસાધ્યં ચ નો હિ તત્ ।

ઔપનિષદશબ્દાર્થઃ સિદ્ધં બ્રહ્મ તતો ન હિ ॥ ૧૪૬॥

વિધ્યર્થવાદમન્ત્રેતિભેદાદ્ વેદસ્ત્રિધા મતઃ ।
વેદસ્યેમે ત્રયો ભેદાઃ કાર્યાર્થપ્રતિપાદકાઃ ॥ ૧૪૭॥

યજેતેત્યાદિવાક્યાનિ વિધયોઽભિહિતાશ્ચ હિ ।
કુર્વન્તિ સંવિધાનં વૈ સ્વર્ગાયાપૂર્વયાગયોઃ ॥ ૧૪૮॥

એતૈશ્ચ વિહિતો યાગોઽપૂર્વશ્ચ ફલદાયકઃ ।
યત્નસાધ્યૌ તતશ્ચેતૌ કાર્યત્વેન મતૌ બુધૈઃ ॥ ૧૪૯॥

સ્તુત્યાદિકારકાશ્ચાર્થવાદાસ્તથા તદન્વિતાઃ ।
દેવાદિસ્મારકા મન્ત્રાઃ પર્યવસ્યન્તિ તત્ર ચ ॥ ૧૫૦॥

પ્રમાણં ચ તતો વેદઃ કાર્યાર્થપ્રતિપાદકઃ ।
મીમાંસા બ્રહ્મણસ્તસ્માદ્ વેદાન્તિનાં હિ નિષ્ફલા ॥ ૧૫૧॥

મીમાંસકવચઃ શ્રુત્વા વેદાન્તિનો વદન્તિ હિ ।
કાર્યમેવ હિ શબ્દાર્થશ્ચૈતત્ પ્રમાણિકં કથમ્ ॥ ૧૫૨॥

કુર્વન્ત્યત્ર સમાધાનં પ્રભાકરાનુયાયિનઃ ।
ગામાનયેતિ વાક્યં હિ શ્રુત્વા પ્રેરકવૃદ્ધતઃ ॥ ૧૫૩॥

વ્યુત્પિત્સુઃ પ્રેર્યવૃદ્ધેન હ્યાનીતાં ગાં ચ પશ્યતિ ।
અશ્વમાનય નય ગામિતિ પ્રેરકવાક્યતઃ ॥ ૧૫૪॥

ગોર્નયનમથાશ્વસ્યાનયનં ચ વિલોક્ય હિ ।
તત્તદ્ગવાદિશબ્દાનાં તત્તદ્ગવાદિવસ્તુષુ ॥ ૧૫૫॥

શક્તિગ્રહસમર્થો હિ વ્યુત્પિત્સુશ્ચ ભવેદિહ ।
કાર્યમેવ હિ શબ્દાર્થસ્તતશ્ચાસ્માભિરુચ્યતે ॥ ૧૫૬॥

કુર્વન્ત્યત્ર સમાધાનં વિશિષ્ટાદ્વૈતવાદિનઃ ।
પ્રવર્ત્તકસ્ય વૃદ્ધસ્ય વાક્યપ્રયોગમાત્રતઃ ॥ ૧૫૭॥

શક્તિગ્રહો ભવત્યેતન્મન્યતે ન વિચક્ષણૈઃ।
ચેષ્ટાકોશાદિતશ્ચાપિ શક્તિગ્રહસ્ય દર્શનાત્ ॥ ૧૫૮॥

પૂર્વં કાર્યાર્થવ્યુત્પત્તિર્બોધે જાતે ચ ત્યજ્યતે ।
શબ્દાર્થશ્ચ મતોઽનન્યલભ્યોઽર્થોઽત્ર બુધૈર્યતઃ ॥ ૧૫૯॥

શ્રુતિવાક્યાત્ તતઃ સિદ્ધાદર્થબોધો હિ જાયતે ।
સિદ્ધશબ્દાર્થબોધસ્ય તસ્માન્નાનુપપન્નતા ॥ ૧૬૦॥

કિઞ્ચ સિદ્ધપરાચ્ચાપિ વાક્યાદ્ બોધશ્ચ જાયતે ।
સન્દેહવાહકાચ્છ્રુત્વા જાતશ્ચૈત્ર તત્રાત્મજઃ ॥ ૧૬૧॥

ચૈત્રહર્ષં તતો દૃષ્ટ્વા વ્યુત્પિત્સુરવગચ્છતિ ।
શ્રુતૈતદ્વાક્યજા ચાત્ર હર્ષસ્ય કારણં મતિઃ ॥ ૧૬૨॥

એવઞ્ચ બ્રહ્મશબ્દાદ્ધિ શ્રોતાત્તુ બ્રહ્મણો મતિઃ ।
કિઞ્ચોપાયાન્તરેણાત્ર શક્તિગ્રહો ભવત્યપિ ॥ ૧૬૩॥

અવ્યુત્પન્નાઁશ્ચ બાલાન્ હિ વ્યુત્પન્નાન્ કર્તુમિચ્છુકાઃ ।
જનનીજનકાદ્યાશ્ચ સ્વાભિશ્ચાઙ્ગુલિભિઃ ખલુ ॥ ૧૬૪॥

દિશન્તસ્તત્તદર્થાંશ્ચ તત્તચ્છબ્દૈઃ પુનઃ પુનઃ ।
સિદ્ધેષ્વર્થેષુ શબ્દાનાં શક્તિં ચ ગ્રાહયન્તિ હિ ॥ ૧૬૫॥

કાર્યાર્થ એવ શબ્દાનાં શક્તિગ્રહેઽપિ સમ્મતે ।
સિદ્ધસ્ય બ્રહ્મણો યુક્તા મીમાંસા બ્રહ્મવાદિનામ્ ॥ ૧૬૬॥

કુતશ્ચેદુચ્યતે ચાત્ર શ્રોતવ્યં સાવધાનતઃ।
બ્રહ્મવિદાપ્નોતિ પરમિત્યસ્તિ વૈદિકં વચઃ ॥ ૧૬૭॥

તદ્વાક્યમનુસૃત્યાત્ર વિધિરૂપં ભવત્યદઃ।
બ્રહ્મપ્રાપ્તિકામઃ ખલુ બ્રહ્મોપાસીત માનવઃ ॥ ૧૬૮॥

પુમાનત્રાધિકારી હિ બ્રહ્મપ્રાપ્તિસમિચ્છુકઃ ।
બ્રહ્મપ્રાપ્તિસમિચ્છા તત્રાધિકારિવિશેષણમ્ ॥ ૧૬૯॥

બ્રહ્માવાપ્તિશ્ચ બ્રહ્માથ કામનાયાં વિશેષણે ।
પ્રાપ્યં ફલં પરબ્રહ્મ બ્રહ્મોપાસનકારિણઃ ॥ ૧૭૦॥

તદ્વિશેષાન્ સ્વરૂપં ચ વદચ્છ્રૌતવચાંસિ હિ ।
કાર્યે ચાપેક્ષિતાર્થસ્ય વાચકાનિ ભવન્તિ વૈ ॥ ૧૭૧॥

ઉપાસનફલબ્રહ્મસ્વરૂપે બોદ્ધુમીપ્સિતે ।
યતો વેત્યાદિશ્રૌતાનિ વાક્યનિ કથયન્તિ તત્ ॥ ૧૭૨॥

જગજ્જન્માદિકૃદ્ રામઃ સર્વાત્મા સર્વધારકઃ ।
સર્વેશ્વરઃ પરબ્રહ્મ સર્વારાધ્યશ્ચ સર્વદઃ ॥ ૧૭૩॥

સર્વશક્તિશ્ચ સર્વસ્યોપાદાનં ચ નિમિત્તકમ્ ।
સવેદેહશ્ચ સર્વજ્ઞઃ કલ્યાણગુણસાગરઃ ॥ ૧૭૪॥

વિભુર્જ્ઞાનસ્વરૂપશ્ચ સ્વભક્ત્યા નિત્યમુક્તિદઃ ।
પરવ્યૂહાદિભેદૈશ્ચ પઞ્ચધા પુરુષોત્તમઃ ॥ ૧૭૫॥

ચિદચિદ્ભ્યાં વિશિષ્ટશ્ચ કાર્યકારણરૂપકઃ ।
ભગવાન્ દિવ્યદેહશ્ચ વિભૂતિદ્વયનાયકઃ ॥ ૧૭૬॥

વેદનેનેતિ સમ્બદ્ધઃ ફલત્વેન હિ રાઘવઃ ।
કાર્યેઽપિ વેદતાત્પર્યે રામો બ્રહ્મ ચ સિદ્ધ્યતિ ॥ ૧૭૭॥

વ્યુત્પત્ત્યાં ચ મતાયાં હિ સિદ્ધે કાર્યેઽથવા ખલુ ।
વેદાન્તિબ્રહ્મજિજ્ઞાસા સફલૈવ ન નિષ્ફલા ॥ ૧૭૮॥

પ્રાભાકરનિરાસે હિ શ્યામાનન્દેન નિર્મિતે ।
સિદ્ધસ્ય બ્રહ્મણશ્ચૈવં બોધ્યતા સુનિરૂપિતા ॥ ૧૭૯॥

પ્રધાનં ન હિ સદ્વાચ્યં સદેવેતિશ્રુતૌ મતમ્ ।
તદૈક્ષતેતિસમ્પ્રોક્તમીક્ષણં તત્ર નો યતઃ ॥ ૧૮૦॥

આત્માઽઽનન્દમયશ્ચાત્ર બ્રહ્માનન્દમયો મતઃ ।
આનન્દમયશબ્દસ્ય તત્રૈવાભ્યાસદર્શનાત્ ॥ ૧૮૧॥

ય એષોઽન્તરાદિત્યે પ્રોક્તઃ પુમાન્ હિરણ્મયઃ ।
બ્રહ્મધર્મોક્તિતો બ્રહ્મહ્યાદિત્યાન્તર્ગતઃ સ ચ ॥ ૧૮૨॥

શરીરિત્વાન્ન જીવોઽયં કુતશ્ચેદુચ્યતે યતઃ ।
આદિત્યાદેર્નિયન્તાઽયં બૃહદારણ્યકે શ્રુતઃ ॥ ૧૮૩॥

અસ્ય લોકસ્ય ઇત્યાદાવાકાશો બ્રહ્મ વૈ યતઃ ।
બ્રહ્મણઃ સર્વભૂતાનાં હેતુતાલિઙ્ગદર્શનાત્ ॥ ૧૮૪॥

પ્રાણ ઇતિ હો વાચાત્ર બ્રહ્મણઃ પ્રાણવાચ્યતા ।
બ્રહ્મણોઽખિલભૂતાનાં હેતુત્વલિઙ્ગદર્શનાત્ ॥ ૧૮૫॥

અતઃ પરો દિવો જ્યોતિરત્ર જ્યોતિઃ પદેન હિ ।
ચરણોક્તેશ્ચ સમ્પ્રોક્તં બ્રહ્મૈવેતિવિનિશ્ચયઃ ॥ ૧૮૬॥

સ હોવાચ પ્રાણોઽસ્મીતિપ્રાણો બ્રહ્મેતિ સમ્મતઃ ।

યતોઽત્ર બ્રહ્મણઃ સર્વેશ્વરત્વાદિર્હિ દૃશ્યતે ॥ ૧૮૭॥

ઉપાસ્યો રાઘવો બ્રહ્મ છન્દોગ્યે હિ મનોમયઃ ।
યતો મનોમયત્વાદ્યા ગુણાસ્તસ્ય શ્રુતિશ્રુતાઃ ॥ ૧૮૮॥

યસ્ય બ્રહ્મ ચ ક્ષત્રં ચ ઉભે ભવત ઓદનઃ ।
અત્ર ચાત્તા પરબ્રહ્મ સર્વસ્યાદનતા યતઃ ॥ ૧૮૯॥

સહ જીવાત્મના રામઃ પ્રવિષ્ટો હૃદ્ગુહામિહ ।
અઙ્ગુષ્ઠપ્રમિતશ્ચાથ ભૂતભવ્યનિયામકઃ ॥ ૧૯૦॥

પાયયિતરિ રામે ચ પાતૃત્વસ્યોપચારતઃ ।
ઉભાવૃતં પિબન્તૌ ચ શ્રુતૌ હિ પરિકીર્ત્તિતૌ ॥ ૧૯૧॥

અન્તરક્ષિણિ પુરુષો શ્રીમદ્રામ ઉદીરિતઃ ।
અમૃતત્વાભયત્વાદિ ગુણાનામુપપત્તિતઃ ॥ ૧૯૨॥

અન્તર્યામ્યધિદૈવાદાવન્તર્યામિતયા શ્રુતઃ ।
સર્વાત્મત્વનિયન્તૃત્વાદેરુક્તત્વાદ્ધિ રાઘવઃ ॥ ૧૯૩॥

અથ પરા યયેત્યસ્યામાદૃશ્યત્વાદિધર્મકઃ ।
સર્વજ્ઞતાદિધર્માણામુક્ત્યા રામોઽખિલેશ્વરઃ ॥ ૧૯૪॥

ઇમં વૈશ્વાનરં ચાત્ર રામો વૈશ્વાનરો મતઃ ।
વૈશ્વાનરસ્ય મૂર્ધૈવ સુતેજા ઇતિરૂપતઃ ॥ ૧૯૫॥

સાધારણૈશ્ચ ધર્મૈર્યદ્વૈશ્વાનરો વિશેષિતઃ ।
દ્યુમૂર્ધત્વાદિધર્માણાં શ્રીરામે સમ્ભવોઽપિ ચ ॥ ૧૯૬॥

યસ્મિન્ દ્યૌઃ પૃથિવીત્યત્ર રામો હ્યાત્મતયા શ્રુતઃ ।
પ્રોક્તાશ્ચ હેતવો યસ્માદમૃતસેતુતાદયઃ ॥ ૧૯૭॥

સર્વોત્કૃષ્ટગુણો રામો યો વૈ ભૂમેત્યુદીરિતઃ ।
જીવાદૂર્ધ્વોપદેશો હિ કારણં તત્ર મન્યતે ॥ ૧૯૮॥

તદક્ષરં ગાર્ગ્યેતસ્મિન્ વાક્યેઽક્ષરં હિ રાઘવઃ ।
અમ્બરાન્તધૃતિશ્ચૈતન્મન્તવ્યસ્ય તુ કારણમ્ ॥ ૧૯૯॥

પરમઃ પુરુષો રામઃ ત્રિમાત્રેણોમિતિ શ્રુતૌ ।
ઈક્ષણવિષયત્વેન વ્યપદેશશ્ચ તસ્ય યત્ ॥ ૨૦૦॥

અસ્મિન્ બ્રહ્મપુરે ચૈતચ્છ્રુતિવાક્યે સમીરિતઃ ।
શ્રીરામો દહરાકાશો વાક્યશેષગહેતુતઃ ॥ ૨૦૧॥

અઙ્ગુષ્ઠમાત્ર ઇત્યાદાવઙ્ગુષ્ઠપ્રમિતો મતઃ ।
ભૂતભવ્યસ્ય ચેશાનઃ શ્રીરામઃ પરમેશ્વરઃ ॥ ૨૦૨॥

પ્રાણ એજતિ વાક્યે ચ પ્રાણવાચ્યશ્ચ રાઘવઃ ।
પ્રાણસ્ય પ્રાણમિત્યુક્ત્યા સર્વસ્ય કમ્પનાત્ તથા ॥ ૨૦૩॥

પરં જ્યોતિરૂપં ચાત્ર રામો જ્યોતિષ્પદેરિતઃ ।
જ્યોતિષાં જ્યોતિરિત્યત્ર જ્યોતિર્વાચ્યત્વદર્શનાત્ ॥ ૨૦૪॥

આકાશો હેતિ છાન્દોગ્યે હ્યાકાશો રામવાચકઃ ।
નામ રૂપેતરત્વેન બ્રહ્મત્વવ્યપદેશતઃ ॥ ૨૦૫॥

રામ એવં પરં બ્રહ્મ રામ એવ પરં તપઃ ।
રામ એવ પરં તત્ત્વં શ્રીરામો બ્રહ્મતારકમ્ ॥ ૨૦૬॥

રમન્તે યોગિનોઽનન્તે નિત્યાનન્દે ચિદાત્મનિ ।
ઇતિ રામપદેનાસૌ પરબ્રહ્માભિધીયતે ॥ ૨૦૭॥

અક્ષરં બ્રહ્મ સત્યં ચ મધ્યે ચાન્તે ચ રાઘવઃ ।
રામઃ સત્યં પરં બ્રહ્મ રામાત્ કિઞ્ચિન્ન વિદ્યતે ॥ ૨૦૮॥

શ્રુતિસ્મૃત્યોરિતિ બ્રહ્મશ્રીરામો વિભુચેતનઃ ।
સકૃદેવ પ્રપત્ત્યા યઃ સર્વાભયપ્રદાયકઃ ॥ ૨૦૯॥

ગુણાબ્ધિઃ સત્યસઙ્કલ્પો જગજન્માદિકારણમ્ ।
સચ્ચિદાનન્દરૂપશ્ચ રામો બ્રહ્મ શ્રુતીરિતમ્ ॥ ૨૧૦॥

ગુણૈશ્ચાથ સ્વરૂપેણ બૃહત્વં પરમં ગતઃ ।
બ્રહ્મવાચ્યસ્તતો રામઃ સર્વાવસ્થાસુ સમ્મતઃ ॥ ૨૧૧॥

આત્મત્વાચ્ચ પરત્વાત્ સ પરમાત્મેતિ કીર્ત્તિતઃ ।
વેવેષ્ટિ યજ્જગત્ સર્વં તત્ સ વિષ્ણુતયેરિતઃ ॥ ૨૧૨॥

અણોરણીયાન્ મહતો મહીયાન્ રાઘવો મતઃ ।
દ્વન્દ્વશૂન્યોઽનવચ્છિન્નરચાનાદિનિધનઃ પ્રભુઃ ॥ ૨૧૩॥

યત્ર નાયં ભવેત્ તાદૃગ્ દેશો નાસ્તિ હિ કુત્રચિત્ ।
અતો દેશપરિચ્છેદઃ શ્રીરામસ્ય ન વિદ્યતે ॥ ૨૧૪॥

યત્ર નાયં ભવેત્ તાદૃગ્ કાલો નાસ્તિ હિ કુત્રચિત્ ।
અતઃ કાલપરિચ્છેદઃ શ્રીરામસ્ય ન વિદ્યતે ॥ ૨૧૫॥

યેન ચાસ્ય પરિચ્છેદસ્તાદૃગ્ વસ્તુ ન કુત્રચિત્ ।
અતો વસ્તુપરિચ્છેદઃ શ્રીરામસ્ય ન વિદ્યતે ॥ ૨૧૬॥

અયં નિરાશ્રયો યસ્માચ્ચાશ્રયો નાસ્ય કોઽપિ તત્ ।
નિરાશ્રયાશ્રયઃ કિન્તુ કશ્ચિન્નાસ્તિં હિ રામવત્ ॥ ૨૧૭॥

વિશ્વપ્રવર્ત્તકો રામો નાસ્ય કશ્ચિત્ પ્રવર્ત્તકઃ ।
રામઃ સર્વેશ્વરઃ કશ્ચિદ્ રામસ્ય ચેશ્વરો ન હિ ॥ ૨૧૮॥

સર્વાત્મા હિ મતો રામો રાસ્યાત્મા ન કોઽપિ ચ ।
રામદેહો જગત્ સર્વં રામો દેહો ન કસ્યચિત્ ॥ ૨૧૯॥

સર્વશેષી મતો રામો રામશેષી ન કોઽપિ હિ ।
રામશેષો જગત્ સર્વં રામઃ શેષો ન કસ્યચિત્ ॥ ૨૨૦॥

સર્વેભ્યશ્ચ પરો રામો રામાત્ તત્ત્વં પરં ન હિ ।
રામશ્ચાદિર્હિ સર્વેષાં રામસ્યાદિર્ન કસ્યચિત્ ॥ ૨૨૧॥

વિશ્વસ્ય કારણં રામો રામસ્ય કારણં ન હિ ।
સર્વેષાં શરણં રામો રામસ્ય શરણં ન ચ ॥ ૨૨૨॥

સર્વારાધ્યશ્ચ રામો હિ રામઃ સર્વફલપ્રદઃ ।
સ્વસ્ય ભક્ત્યા પ્રપત્ત્યા ચ શ્રીરામો મુક્તિકારકઃ ॥ ૨૨૩॥

દિવ્યાકારયુતો રામઃ સાકારઃ સમ્મતસ્તતઃ ।
પ્રાકૃતાકારશૂન્યત્વાન્નિરાકારશ્ચ કીર્ત્તિતઃ ॥ ૨૨૪॥

કલ્યાણગુણવત્ત્વેન શ્રીરામઃ સગુણો મતઃ ।
પ્રાકૃતગુણશૂન્યત્વાન્નિર્ગુણશ્ચ પ્રકીર્ત્તિતઃ ॥ ૨૨૫॥

ભર્ત્તા ભોક્તા ચ સર્વેષાં ભાસ્કરાદેશ્ચ ભાસકઃ ।
રામશ્ચૈકો હિ સર્વેષુ સ્થિતઃ કાષ્ઠેષુ વહ્નિવત્ ॥ ૨૨૬॥

ભાવયેદ્ વૈષ્ણવો વૃન્દામાલોર્ધ્વપુણ્ડ્રધારકઃ ।
દીક્ષિતો રામમન્ત્રેણ રામં સાધ્યં ચ સાધનમ્ ॥ ૨૨૭॥

પ્રાપ્યો મુમુક્ષુભી રામો ભક્તિતશ્ચ પ્રપત્તિતઃ ।

નિત્યૈર્મુક્તૈશ્ચ નિત્યં હિ સ્તુતોઽર્ચિતશ્ચ સેવિતઃ ॥ ૨૨૮॥

વિચ્છેદરહિતા પ્રીત્યા ભક્તી રામસ્ય સંસ્મૃતિઃ ।
યા બોધાયનસમ્પ્રોક્તાજ્જાતા સાધનસપ્તકાત્ ॥ ૨૨૯॥

શ્રીરામસ્યાનવચ્છિન્નં સ્મરણં પ્રીતિપૂર્વકમ્ ।
શ્રીમદ્વૈષ્ણવાચાર્યૈર્ભક્તિયોગતયા મતમ્ ॥ ૨૩૦॥

અઙ્ગમષ્ટાઙ્ગયોગોઽઙ્ગી ભક્તિયોગઃ પ્રકીર્તિતઃ ।
લભ્યતે ભગવાન્ રામો ભક્તિયોગેન નાન્યથા ॥ ૨૩૧॥

ભક્તિર્બોધાયનપ્રોક્તૈર્વિવેકાદિકસાધનૈઃ ।
ધ્યાનધ્રુવસ્મૃતીત્યાદિશબ્દવાચ્યા પ્રજાયતે ॥ ૨૩૨॥

સંસારિતા મતાઽભક્ત્યા ભક્ત્યા મુક્તિરુદીરિતા ।
આમૃત્યુસમયં ભક્તેરાવૃત્તિશ્ચ મતા શ્રુતૌ ॥ ૨૩૩॥

પ્રારબ્ધાન્તે મતા ભક્તિર્મુક્તિદા ચાર્ચિરાદિના ।
અઙ્ગિની ચ મતા ભક્તિરઙ્ગે ચ જ્ઞાનકર્મણી ॥ ૨૩૪॥

શ્રવણં કીર્ત્તનં વિષ્ણોઃ સ્મરણં પાદસેવનમ્ ।
અર્ચનં વન્દનં દાસ્યં સખ્યમાત્મનિવેદનમ્ ॥ ૨૩૫॥

એવં મહાપુરાણે શ્રીભાગવતે હિ મુક્તિદા ।
ભક્તેશ્ચ નવધા ભેદાઃ પ્રહ્લાદેન પ્રકીર્ત્તિતાઃ ॥ ૨૩૬॥

એભિરારાધિતો રામો ભક્તે પરં પ્રસીદતિ ।
યોગક્ષેમં વહઁલ્લોકે ચાન્તે મુક્તિં પ્રયચ્છતિ ॥ ૨૩૭॥

ઘૃતં જલાત્ તથા તૈલં સિકતાતશ્ચ નિઃસરેત્ ।
તથાઽપિ ભગવદ્ભક્તિં વિના મુક્તેર્ન સમ્ભવઃ ॥ ૨૩૮॥

પૂર્વાઘનાશિની ચાથ પરાઘશ્લેષવર્જિની ।
ભક્તિરેવ તતઃ સૈવ પુસાં સંસારનાશિની ॥ ૨૩૯॥

એવં ભક્તિઃ સમાખ્યાતા પ્રબન્ધે યોગપઞ્ચકે ।
શ્રીપ્રમિતાક્ષરાકારદેવાનન્દાર્યનિર્મિતે ॥ ૨૪૦॥

રામસ્ય બ્રહ્મણોઽનન્યભક્ત્યૈવ મુક્તિરાપ્યતે ।
ભક્તિર્ધ્રુવા સ્મૃતિઃ સા ચ વિવેકાદિકસપ્તકાત્ ॥ ૨૪૧॥

જાત્યાશ્રયનિમિત્તૈર્યદ્ દુષ્ટમન્નં ભવેન્ન હિ ।
તસ્માદ્ દેહસ્ય સંશુદ્ધિર્વિવેકઃ કથ્યતે બુધૈઃ ॥ ૨૪૨॥

શબ્દરૂપરસંસ્પર્શગન્ધેષુ વિષયેષુ યઃ ।
અનાદરઃ સ તત્ત્વજ્ઞૈર્વિમોકઃ પરિકીર્ત્તિતઃ ॥ ૨૪૩॥

શુભાશ્રયસ્ય યચ્ચાત્ર સંશીલનં પુનઃ પુનઃ ।
અભ્યાસઃ સાધનં તદ્ધિ યોગવ્યાનોપકારકમ્ ॥ ૨૪૪॥

યથાશક્તિ હિ પઞ્ચાનાં યજ્ઞાનાં મહતાં તથા ।
આશ્રમાન્તરધર્માણામનુષ્ઠાનં ક્રિયા મતા ॥ ૨૪૫॥

અહિંસા ચાનભિધ્યા ચ સત્યાર્જવે તથા દયા ।
દાનં ચૈતાનિ કલ્યાણતયામ્નાતાનિ સૂરિભિઃ ॥ ૨૪૬॥

શોકભીતિનિમિત્તેનાવસાદશ્ચિત્તદીનતા ।
તદભાવો હિ સમ્પ્રોક્તોઽનવસાદો મહાત્મભિઃ ॥ ૨૪૭॥

ઉદ્ધર્ષઃ ખલુ સન્તોષોઽનુદ્ધર્ષસ્તદ્વિપર્યયઃ ।
શોકવચ્ચાતિસન્તોષે મનઃશૈથિલ્યહેતુતા ॥ ૨૪૮॥

સાધનદીપિકાયાં ચૈતાદૃક્ સાધનસપ્તકમ્ ।
શ્રીબોધાયનવૃત્તિસ્થં ગઙ્ગાધરેણ વર્ણિતમ્ ॥ ૨૪૯॥

અનન્યચેતસા સતતં યો માં સ્મરતિ નિત્યશઃ ।
તસ્યાહં સુલભઃ પાર્થ નિત્યયુક્તસ્ય યોગિનઃ ॥ ૨૫૦॥

તદ્રૂપપ્રત્યયે ચૈકા સન્તતિશ્ચાન્યનિઃ સ્પૃહા ।
તદ્ધ્યાનં પ્રથમૈઃ ષડ્ભિરઙ્ગૈર્નિષ્પાદ્યતે તથા ॥ ૨૫૧॥

ઉપાસનસ્ય ચાવૃત્તિં વદન્તિ સ્મૃતયાસ્ત્વિતિ ।
ઉપાસ્યઃ સ્વાત્મરૂપેણ રામસ્તૂપાસકૈઃ સદા ॥ ૨૫૨॥

ચિત્તસ્યૈકાગ્રતા યત્ર તત્રોપાસ્યસ્તુ રાઘવઃ ।
ઉપાસનં ચ કર્ત્તવ્યમાસીનેન જનેન હિ ॥ ૨૫૩॥

યથાક્રતુનયાદ ભક્તો જ્ઞાતૃત્વરૂપતામિવ ।
અપહતાઘતાં ચાપિ સ્વસ્વરૂપસ્ય ચિન્તેયત્ ॥ ૨૫૪॥

સસીતાય ચ રામાય યચ્ચ સ્વાત્મસમર્પણમ્ ।
તત્ પ્રપત્તિતયા પ્રોક્તમાચાર્યવાસવૈઃ શુભમ્ ॥ ૨૫૫॥

નાવાપ્યતે પરં ધામ તપોયોગસમાધિભિઃ ।
સકૃદ્રામપ્રપત્ત્યૈવ પ્રાણિભિઃ પ્રાપ્યતે હિ તત્ ॥ ૨૫૬॥

તાપત્રયાભિતપ્તેન ગતિશૂન્યજનેન હિ ।
પુરુષોત્તમરામસ્ય દયાબ્ધેઃ સન્નિધૌ કૃતા ॥ ૨૫૭॥

ત્વમેવોપાયભૂતો મેં ભવેતિ પ્રાર્થના ચ યા ।
તત્પૂર્વકાત્મનિક્ષેપઃ પ્રપત્તિત્વેન સમ્મતઃ ॥ ૨૫૮॥

વિશેષણાંશમાદાય સ એવ શરણાગતિઃ ।
અથાદૃત્ય વિશેષ્યાંશ ન્યાસવાચ્યઃ સ એવ હિ ॥ ૨૫૯॥

ઉક્તં ચ ન્યાસતત્ત્વજ્ઞૈર્ન્યાસસ્યાસ્યાઙ્ગપઞ્ચકમ્ ।
અનાયાસેન બોધાય સઙ્ક્ષેપેણ તદુચ્યતે ॥ ૨૬૦॥

આનુકૂલ્યસ્ય સઙ્કલ્પસ્તત્ર ચાદ્યાઙ્ગમુચ્યતે ।
આશ્રયસ્યાનુવૃત્તૌ હિ સઙ્કલ્પોઽત્ર વિધીયતે ॥ ૨૬૧॥

ઉક્તમઙ્ગં દ્વિતીયં હિ પ્રાતિકૂલ્યસ્ય વર્જનમ્ ।
ક્રિયતે ન પ્રપન્નેન યત્ર શાસ્ત્રેણ વર્જિતમ્ ॥ ૨૬૨॥

રક્ષિષ્યતીતિ વિશ્વાસો ન્યાસાઙ્ગં હિ તૃતીયકમ્ ।
સ્વરક્ષાસંશયો યત્ર સર્વથા પરિવર્જિતઃ ॥ ૨૬૩॥

ન્યાસસ્યાઙ્ગં ચતુર્થં તુ ગોપ્તૃત્વવરણં મતમ્ ।
તત્ ત્રાતા મે ત્વમેવ સ્યાઃ ઇત્યેવં પ્રાર્થનાત્મકમ્ ॥ ૨૬૪॥

ઉદારઃ સર્વવિચ્ચાથ સર્વશક્તિશ્ચ રાઘવઃ ।
રક્ષણે રક્ષણીયસ્ય રક્ષાપેક્ષામપેક્ષતે ॥ ૨૬૫॥

ન્યાસસ્ય પઞ્ચમં ત્વઙ્ગ કાર્પણ્યં સમુદીરિતમ્ ।
પ્રપન્નસ્યાન્વયો યત્રોપાયાન્તરેષુ વર્જિતઃ ॥ ૨૬૬॥

શ્રીમદ્રામં પ્રપન્નાશ્ચ ધ્યાનયોગં વિનાઽપિ વૈ ।
મૃત્યુસિન્ધુમતિક્રમ્ય ચામૃતત્વં પ્રયાન્તિ હિ ॥ ૨૬૭॥

સરલઃ સુગમશ્ચાથ સકૃત્ કાર્યોઽનપેક્ષકઃ ।
યતસ્તતોઽયમન્યસ્માન્ન્યાસઃ શ્રેષ્ઠતમો મતઃ ॥ ૨૬૮॥

ત્યક્ત્વોપાયાન્તરં મુક્ત્યૈ કાર્યો ન્યાસસમાશ્રયઃ ।

સર્વેભ્યો ચાભયં દત્તે રામઃ સકૃત્ પ્રપત્તિતઃ ॥ ૨૬૯॥

સર્વેષાં પ્રાણિનાં ચાત્ર પ્રપત્તાવધિકારિતા ।
જનાશ્ચેશં પ્રપદ્યૈવ માયાં તરન્તિ દુસ્તરામ્ ॥ ૨૭૦॥

ન્યાસો દૃપ્તપ્રપન્નાનાં દેહાન્તરનિવારકઃ ।
આર્ત્તાનાં ચ સ એવાશુ મુક્તિદો હિ સકૃત્ કૃતઃ ॥ ૨૭૧॥

અસ્મદ્ગુરુવરૈશ્ચૈવં શ્રીચિદાનન્દદેશિકૈઃ ।
પ્રપત્તેઃ સત્સ્વરૂપં હિ પ્રોક્તં ન્યાસકલાનિધૌ ॥ ૨૭૨॥

રામાયત્તસ્થિતિત્વાચ્ચ સર્વસ્મિન્ રામદેહતા ।
સામાનાધિકરણ્યં તદ્ રામે સર્વસ્ય ભાસતે ॥ ૨૭૩॥

પ્રમાણલક્ષણાભ્યાં ચ વસ્તુસિદ્ધિર્હિ મન્યતે ।
નિર્વિશેષે દ્વયાભાવાત્ તાદૃગ્ બ્રહ્મ ન સિદ્ધ્યતિ ॥ ૨૭૪॥

રામઃ પ્રકૃતિભિન્નોઽસ્તિ સત્વાદિરહિતો યતઃ ।
ચેતનત્વાજડત્વાભ્યાં સર્વદેહિતયા તથા ॥ ૨૭૫॥

ચેતનત્વાજડત્વાભ્યાં રામેઽસ્તિ કાલભિન્નતા ।
પ્રત્યક્ત્વાચ્ચેતનત્વાચ્ચ શુદ્ધસત્વં ન રાઘવઃ ॥ ૨૭૬॥

તત એવ ચ શ્રીરામો જ્ઞાનભિન્નો મતો બુધૈઃ ।
રામશ્ચાદ્રવ્યભિન્નોઽસ્તિ તત્રસ્તિ દ્રવ્યતા યતઃ ॥ ૨૭૭॥

સર્વેશત્વાદ્ વિભુત્વાચ્ચાકર્માધીનતયા તથા ।
જગજ્જન્માદિહેતુત્વાદ્ રામે જીવવિભિન્નતા ॥ ૨૭૮॥

ઈશાનો ભૂતભવ્યસ્ય શ્રુતૌ રામોઽખિલેશ્વરઃ ।
જીવભિન્નતથા ચોક્તૌ ગીતાયાં પુરુષોત્તમઃ ॥ ૨૭૯॥

શરીરસ્થોઽપિ કૌન્તેય ન કરોતિ ન લિપ્યતે ।
કર્માનધીનતા ચેશે ગીતાયામિતિ ભાષિતા ॥ ૨૮૦॥

પ્રમાણાભાવતો રામસ્યેશ્વરત્વં ન માયિકમ્ ।
માયિકી ન તથા રામે જગજન્માદિ હેતુતા ॥ ૨૮૧॥

પરો વ્યૂહશ્ચ વિભવોઽન્તર્યામ્યર્ચાવતારકઃ ।
પઞ્ચધાવસ્થિતઃ ચૈવં શ્રીરામઃ સકલેશ્વરઃ ॥ ૨૮૨॥

અપ્રાકૃતેઽજડે નિત્યેઽવ્યયે ચ તમસઃ પરે ।
યદ્ ગત્વા ન નિવર્ત્તન્તે તસ્મિન્ શ્રીરામધામનિ ॥ ૨૮૩॥

મુક્તાત્મનાં ચ નિત્યાનાં તથા શ્રીરામસીતયોઃ ।
ભોગસ્થાને ચ ભોગ્યે ચ ભોગોપકરણાત્મકે ॥ ૨૮૧॥

રાઘવસ્ય પ્રપત્ત્યા વા ભક્ત્યા પ્રાપ્યેઽર્ચિરાદિના ।
રમ્યકલ્પદ્રુમારામપ્રમોદવનભૂષિતે ॥ ૨૮૫॥

સરયૂમણિશૈલાભ્યાં શોભિતે નિત્યધામનિ ।
શુદ્ધસત્વમયે દિવ્યે સાકેતે ચ પરાત્પરે ॥ ૨૮૬॥

દિવ્યૈશ્ચ દ્વારપાલૈશ્ચ મણ્ડિતે ચાઙ્ગદાદિભિઃ ।
અયોધ્યાનગરેઽયોધ્યે સર્વભીતિવિવર્જિતે ॥ ૨૮૭॥

બ્રહ્મહર્મ્યાઙ્ગણે રમ્યેઽનન્તસૂર્યપ્રભાન્વિતે ।
કલ્પતરુતલે દિવ્યપુષ્પાસ્તીર્ણે મનોહરે ॥ ૨૮૮॥

ચન્દ્રોપમવિતાનસ્યાધસ્તાદ્ધૈમે ધરાતલે ।
દિવ્યમાણિક્યવેદ્યાં ચ રત્નસિંહાસને શુભે ॥ ૨૮૯॥

સેવિતશ્ચાઞ્જનેયાદ્યૈર્નિત્યૈર્મુક્તૈશ્ચ સંસ્તુતઃ ।
પાલકઃ સર્વલોકાનાં સર્વલોકૈકકારણમ્ ॥ ૨૯૦॥

પરિપૂર્ણતમં બ્રહ્મ કલેશઃ ક્લેશવર્જિતઃ ।
અંશી સર્વાવતારી ચ સર્વેશઃ શ્રુતિદર્શિતઃ ॥ ૨૯૧॥

દિવ્યસુવર્ણસદ્દણ્ડચ્છત્રચામરધારિભિઃ ।
વસ્ત્રભૂષાઽઽવૃતૈર્ભવ્યૈરાવૃતો નિત્યપાર્ષદૈઃ ॥ ૨૯૨॥

નીલમ્બુજસમઃ શ્યામો કુઞ્ચિતશ્યામકુન્તલઃ ।
કપ્યાસપુણ્ડરીકાક્ષઃ શારદેન્દુનિભાનનઃ ॥ ૨૯૩॥

દિવ્યપરિચ્છદો દિવ્યો દિવ્યશસ્ત્રાસ્ત્રધારકઃ ।
સચ્ચિદાનન્દદેહશ્ચ દિવ્યભૂષણભૂષિતઃ ॥ ૨૯૪॥

મુક્તિદશ્ચ મુમુક્ષૂણાં ધ્યાનાર્ચાવન્દનાદિભિઃ ।
પાદપદ્માશ્રયાત્ સર્વદુઃખહૃત્ સુખકૃત્ તથા ॥ ૨૯૫॥

સર્વજ્ઞઃ સર્વછક્તિશ્ચ સર્વદેહશ્ચ સર્વગઃ ।
સર્વવિદ્યાસુ ચારાધ્યઃ સર્વસ્ય જગતો ગુરુઃ ॥ ૨૯૬॥

દિવ્યગન્ધાનુલિપ્તાઙ્ગો કલ્યાણગુણવારિધિઃ ।
અભિરામઃ પરો રામઃ શોભિતઃ સીતયા સહ ॥ ૨૯૭॥

સર્વાવતારમૂલં સ દીપોત્પાદકદીપવત્ ।
ઉપાસ્યશ્ચાશ્રયશ્ચાથ સર્વેષામભિરક્ષકઃ ॥ ૨૯૮॥

સ્વાનુરૂપશ્ચ નિત્યશ્ચ શ્રીમદ્રામસ્ય વિગ્રહઃ ।
અવયવૈરનારબ્ધો વૃદ્ધિક્ષયાદિવર્જિતઃ ॥ ૨૯૯॥

માણિક્યપેટિકાવત્ સ સ્વરૂપસ્ય પ્રકાશકઃ ।
શુદ્ધસત્વમયો દિવ્યો પ્રાકૃતત્વં ન તસ્ય હિ ॥ ૩૦૦॥

સર્વાતિશાયિતેજસ્વી શ્રેયોગુણગણાર્ણવઃ ।
નિત્યમુક્તાનુભાવ્યઃ સોઽનુસન્ધેયશ્ચ યોગિનામ્ ॥ ૩૦૧॥

મોહકઃ સ ચ સર્વેષાં દિવ્યમણ્ડનમણ્ડિતઃ ।
દિવ્યરૂપવિશિષ્ટઃ સ દિવ્યવસ્ત્રાસ્ત્રશોભિતઃ ॥ ૩૦૨॥

રામ એવં પરં બ્રહ્મ રામ એવં પરં તપઃ ।
પરતા બ્રહ્મતા ચેતિ રામે હનુમતેરિતા ॥ ૩૦૩॥

વ્યાપ્તિક્રાન્તિપ્રવેશેચ્છાસ્તત્તદ્ધાતુનિબન્ધનાઃ ।
પરત્વદ્યોતિકાઃ વિષ્ણોર્દેવસ્ય પરમાત્મનઃ ॥ ૩૦૪॥

વ્યાપ્નોતિ દેશકાલાભ્યાં સર્વં યદ્ રૂપતોઽપિ ચ ।
તત્પરં ગદિતં સદ્ભિર્વિષેર્ધાતોર્નિરૂપણાત્ ॥ ૩૦૫॥

કાન્તિર્નામ ગુણોત્કર્ષો ગુણા જ્ઞાનબલાદયઃ ।
અતિવેલં પ્રકૃષ્યન્તે યત્ર કાન્તઃ સ ઈરિતઃ ॥ ૩૦૬॥

અકાન્તાશ્ચેતનાઃ સર્વે કાન્તઃ સ પુરુષઃ પરઃ ।
કાન્તિર્નામ ગુણઃ સોઽયં વદેર્ધાતોનિરૂપણાત્ ॥ ૩૦૭॥

ચેતનાચેતનાઃ સર્વે વિશન્ત્યેવ યતઃ સ્વયમ્ ।
મહીયાંસ વિશત્યેવ યોઽણીયાનણુષુ સ્વયમ્ ॥ ૩૦૮॥

સ પરો ગદિતઃ સદ્ભિર્વિષેર્ધાતોર્નિરૂપણાત્।
ય ઇષ્યતે સદા સર્વૈરાત્મભાવેન ચેતનૈઃ ॥ ૩૦૯॥

સ પરો ગદિતઃ સદ્ભિરિષેર્ધાતોર્નિરૂપણાત્ ।

અહિર્બુધ્ન્યસંહિતાયામીશસ્ય પરતાત્વિતિ ॥ ૩૧૦॥

જગત્પૂજ્યા જગદ્વન્દ્યા મુક્તિદા જગદીશ્વરી ।
જગદ્દેહા જગન્માતા જગદ્ધેતુશ્ચ ભૂમિજા ॥ ૩૧૧॥

વિદ્યુદાભા દયામ્ભોધિઃ સચ્ચિદાનન્દવિગ્રહા ।
નિત્યમુક્તસમારાધ્યા દિવ્યવસ્ત્રૈરલઙ્કૃતા ॥ ૩૧૨॥

વિભ્વી સર્વેશ્વરી સીતા દિવ્યભૂષણભૂષિતા ।
રામાભિન્નાઽતિરમ્યા ચાર્ચનીયા રામવલ્લભા ॥ ૩૧૩॥

મમાપરાધવૃન્દાઁશ્ચ રામચન્દ્રસ્વતન્ત્રતામ્ ।
સંવિનાશ્ય ચ સીતામ્બા પ્રાપ્યાથ સ્વામિની પરા ॥ ૩૧૪॥

કારુણ્યસિન્ધુરામસ્ય કારુણ્યાદીંશ્ચ સદ્ગુણાન્ ।
સમુદ્બોધ્ય ચ સમ્પ્રાપ્તાં મમ પુરુષકારતામ્ ॥ ૩૧૫॥

અનુગ્રહમયીં દેવીં નિગ્રહેણ ચ વર્જિતામ્ ।
શ્રીસીતાં ચિન્તયેદેવં શ્રીરામશરણાગતઃ" ॥ ૩૧૬॥

ઇત્યેવં નવરત્યાં હિ શ્રીસીતામ્બા નિરૂપિતા ।
સિધ્દ્ધાન્તભૂષણેન શ્રીશ્યામાનન્દેન ધીમતા ॥ ૩૧૭॥

વેદવેદ્યૌ ચ સદ્વન્દ્યૌ સીતારામૌ પરાત્પરૌ ।
અનન્યભક્તિસમ્પ્રાપ્યો પ્રપન્નજનરક્ષકૌ ॥ ૩૧૮॥

ઈશ્વરઃ સર્વભૂતાનામાદિકારણમુચ્યતે ।
સર્વજ્ઞ જ્ઞાનશક્ત્યાદિકલ્યાણગુણભૂષિતઃ ॥ ૩૧૯॥

ધર્માર્થકામમોક્ષાણાં પ્રદાતા રઘુનન્દનઃ ।
દિવ્યવિગ્રહસંયુક્તોઽનન્તાનન્દોજગત્પતિઃ ॥ ૩૨૦॥

યદ્યપ્યાર્ત્તિહરો રામો હ્યન્તર્યામી મહાપ્રભુઃ ।
તથાપ્યાત્મકૃતૈઃ કાર્યૈર્ન કદાપિ સ બધ્યતે ॥ ૩૨૧॥

યથા બાલ્યાદ્યવસ્થાભિર્ન જીવો દૂષ્યતે ક્વચિત્ ।
તથાઽન્તશ્ચરમાણોઽપિ ન ભવેદ્ દૂષિતો હરિઃ ॥ ૩૨૨॥

પરવ્યૂહાદિભેદેન વિજ્ઞેયઃ સ ચ પઞ્ચધા ।
બહુભિર્દ્વારપાલૈશ્ચ કોટ્ટપાલૈશ્ચ સંયુતઃ ॥ ૩૨૩॥

મહામણિસમાકીર્ણે મણ્ડપે ચ વિરાજિતઃ ।
શોભયા પરયા યુક્તઃ કિરીટમુકુટાદિભિઃ ॥ ૩૨૪॥

મહારાજ્ઞ્યા ચ જાનક્યા ભૂનીલાભ્યાં ચ સેવિતઃ ।
સઙ્કર્ષણશ્ચ પ્રદ્યુમ્નોઽનિરુદ્ધ ઇતિ ભેદતઃ ॥ ૩૨૫॥

વિજ્ઞેયશ્ચ તથા વ્યૂહો જગત્સૃષ્ટ્યાદિકારકઃ ।
પૂર્ણો જ્ઞાનબલાભ્યાં ચ સઙ્કર્ષણઃ ઇતિ સ્મૃતઃ ॥ ૩૨૬॥

વીર્યૈશ્વર્યયુતસ્તત્ર પ્રદ્યુમ્ન ઇતિ કથ્યતે ।
શક્તિતેજો વિશિષ્ટસ્તુ હ્યનુરુદ્ધ ઇતીરિતઃ ॥ ૩૨૭॥

તત્તત્સાજાત્યરૂપેણ હ્યાવિર્ભાવઃ પરસ્ય વૈ ।
વિભવઃ સ ચ વિજ્ઞેયો મુખ્યો ગૌણશ્ચ સ દ્વિધા ॥ ૩૨૮॥

ઉપાસ્યઃ પુરુષૈર્મુખ્યો ન ચ ગૌણઃ કદાચન ।
સર્વત્ર સર્વદા યસ્તુ જીવાઁસ્ત્યક્તું ન ચ ક્ષમઃ ॥ ૩૨૯॥

અન્તર્યામી સ વિજ્ઞેયો જીવદોષૈરદૂષિતઃ ।
દેશકાલાદિનિયમૈ રહિતઃ સ સહાપ્રભુઃ ॥ ૩૩૦॥

ધાતુપાષાણકાષ્ઠાદિકૃતવિગ્રહમાશ્રિતઃ ।
શ્રીરામઃ સ પરં બ્રહ્મ જાનક્યા સહિતઃ પ્રભુઃ ॥ ૩૩૧॥

અર્ચાવતારો વિજ્ઞેયઃ કૃપાશીલો ગુણામ્બુધિઃ ।
એવં પઞ્ચપ્રકારેણ હ્યેકોઽપિ સ મહાપ્રભુઃ ॥ ૩૩૨॥

વિભક્તો ભગવાન્ રામઃ સર્વલોકૈકરક્ષકઃ ।
સેવિતઃ પરયા ભક્ત્યા સન્તુષ્ટઃ સ હરિસ્તદા ॥ ૩૩૩॥

સ્વાશ્રિતેભ્યશ્ચ દાસેભ્યઃ સાયુજ્યં સમ્પ્રયચ્છતિ ।
શ્રીવાલ્મીકિસંહિતાયામેવં રામો હિ પઞ્ચધા ॥ ૩૩૪॥

વ્યૂહસ્વરૂપં ઃ
વ્યક્તં ચ પૂર્ણષાડ્ગુણ્યં વર્ત્તતે યત્ર સર્વદા ।
પરિપૂર્ણઃ સ વિજ્ઞેયો બ્રહ્મ રામઃ પરાત્પરઃ ॥ ૩૩૫॥

શ્રીરામાદ્ધિ ચતુર્વ્યૂહાઃ પ્રાદુર્ભૂતા ભવન્તિ હિ ।
વાસુદેવઃ સઙ્કર્ષણઃ પ્રદ્યુમ્નશ્ચાનિરુદ્ધકઃ ॥ ૩૩૬॥

વ્યૂહ્યાત્માનં ચતુર્ધા ચ વાસુદેવાદિ મૂર્તિભિઃ ।

સૃષ્ટ્યાદીન્ પ્રકરોત્યેષ વિશુદ્ધાત્મા જનાર્દનઃ ॥ ૩૩૭॥

એવં વિષ્ણુપુરાણેઽપિ સૃષ્ટ્યાદિસંવિધાયકાઃ ।
બ્રહ્મણો રામચન્દ્રાદ્ધિ ચતુર્વ્યૂહાઃ પ્રકીર્ત્તિતાઃ ॥ ૩૩૮॥

વાસુદેવઃ સઙ્કર્ષણઃ પ્રદ્યુમ્નશ્ચાનિરુદ્ધકઃ ।
ઇત્યાદ્યન્યતમઃ શાસ્ત્રે વ્યૂહો હિ સમ્પ્રકીર્ત્તિતઃ ॥ ૩૩૯॥

તેષ્વાદ્યો વાસુદેવો હિ હીનઃ સ પ્રાકૃતૈર્ગુણૈઃ ।
તતોઽસૌ નિર્ગુણઃ પ્રોક્તઃ ષડ્ગુણૈઃ સગુણોઽપિ સઃ ॥ ૩૪૦॥

પ્રધાનક્ષેત્રજ્ઞપતિર્વાસુદેવઃ શ્રુતૌ શ્રતઃ ।
સ ગુણાનામધિષ્ઠાતા બન્ધમુક્તિપ્રદો મતઃ ॥ ૩૪૧॥

તતો જીવાભિમાની હિ સઙ્કર્ષણઃ પ્રજાયતે ।
સઙ્કર્ષણસ્તદાઽઽશ્રિત્ય પ્રાકૃતં હિ તમોગુણમ્ ॥ ૩૪૨॥

સંહરતે જગત્ સર્વં શિવો ભૂત્વા બલેન સઃ ।
સ્વસ્ય જ્ઞાનગુણેનાથ સચ્છાસ્ત્રં વિતનોત્યપિ ॥ ૩૪૩॥

તતો મનોભિમાની હિ પ્રદ્યુમ્નઃ સમ્પ્રજાયતે ।
સમાશ્રિત્ય તદાઽયં તુ પ્રાકૃતં ચ રજોગુણમ્ ॥ ૩૪૪॥

વિશ્વકૃદ્ બ્રહ્મતાં ગત્વા સ્વસ્યૈશ્વર્યગુણેન હિ ।
પ્રવર્ત્તયતિ ધર્માંશ્ચ વીર્યેણ સાત્વિકાનથ ॥ ૩૪૫॥

અહઙ્કારાભિમાની ચાનિરુદ્ધો જાયતે તતઃ ।
તદાનીં સ સમાશ્રિત્ય સત્વં ચ પ્રાકૃતં ગુણમ્ ॥ ૩૪૬॥

વિષ્ણુર્ભૂત્વાઽખિલં વિશ્વં શક્ત્યા પાતિ વિભર્ત્તિ ચ ।
સ્વતત્ત્વં સ્વગુણેનાથ તેજસા જ્ઞાપયત્યસૌ ॥ ૩૪૭॥

વાસુદેવાત્ સઙ્ઘર્ષણ ઇત્યાદ્યાગમવાક્ષુ હિ ।
સઙ્કર્ષણે ન જીવત્વં કિન્તુ જીવાભિમાનિતા ॥ ૩૪૮॥

સ હ્યનાદિરનન્તશ્ચ પરમાર્થેન નિશ્ચિતઃ ।
ઇતિ તસ્યાં સંહિતાયાં જીવોત્પત્તેર્નિષેધનાત્ ॥ ૩૪૯॥

સઙ્કર્ષણાત્ પ્રદ્યુમ્નસંજ્ઞં મનશ્ચેતિવાચિ ચ ।
પ્રદ્યુમ્નો ન મનઃ કિન્તુ તત્ર મનોઽભિમાનિતા ॥ ૩૫૦॥

કરણાત્મકં મનો યસ્માત્ કર્તુર્નોત્પદ્યતે ખલુ ।
પ્રદ્યુમ્નાદનિરુદ્ધસંજ્ઞકોઽહઙ્કાર ઇત્યપિ ॥ ૩૫૧॥

અહઙ્કારાભિમાનીત્યનિરુદ્ધં સમ્બ્રવીતિ હિ ।
કદાપિ મનસશ્ચાત્ર નાહઙ્કારસમુદ્ભવઃ ॥ ૩૫૨॥

તતઃ સઙ્કર્ષણાદીનાં ન જીવાદ્યભિધાયિતા ।
કિન્તુ જીવાદ્યધિષ્ઠાતૃતત્તદ્વ્યૂહ્સ્વરૂપતા ॥ ૩૫૩॥

તત્ર જ્ઞાનબલદ્વન્દ્વાદ્ રૂપં સાઙ્કર્ષણં હરેઃ ।
ભગવાનચ્યુતોઽપીત્થં ષાડ્ગુણ્યેન સમેધિતઃ ॥ ૩૫૪॥

બલજ્ઞાને ગુણૌ તસ્ય સ્ફુટૌ કાર્યવશાન્મુને ।
બલેન હરતીદં સ ગુણેન નિખિલં મુને ॥ ૩૫૫॥

જ્ઞાનેન તનુતે શાસ્ત્રં સર્વસિદ્ધાન્તગોચરમ્ ।
વેદશાસ્ત્રમિતિખ્યાતં પાઞ્ચરાત્રં વિશેષતઃ ॥ ૩૫૬॥

ઐશ્વર્યવીર્યસમ્ભેદાદ્ રૂપં પ્રાદ્યુમ્નમુચ્યતે ।
ઐશ્વર્યેણ ગુણેનાસૌ સૃજતે તચ્ચરાચરમ્ ॥ ૩૫૭॥

વીર્યેણ સર્વધર્માંશ્ચ પ્રવર્ત્તયતિ સર્વશઃ ।
શક્તિતેજઃસમુત્કર્ષાદનિરુદ્ધતનુર્હરેઃ ॥ ૩૫૮॥

શક્ત્યા જગદિદં સર્વમનન્તાણ્ડં નિરન્તરમ્ ।
વિભર્ત્તિ પાતિ ચ હરિર્મણિસાનુરિવાણુકમ્ ॥ ૩૫૯॥

તેજસા નિખિલં તત્ત્વં જ્ઞાપયત્યાત્મનો મુને ।
વિષ્વક્સેનસંહિતાયામેવં વ્યૂહા હિ વર્ણિતાઃ ॥ ૩૬૦॥

વાસુદેવઃ સઙ્કર્ષણઃ પ્રદ્યુમ્નઃ પુરુષઃ સ્વયમ્ ।
અનિરુદ્ધ ઇતિ બ્રહ્મન્ મૂર્ત્તિર્વ્યૂહોઽભિધીયતે ॥ ૩૬૧॥

સ વિશ્વસ્તૈજસઃ પ્રાજ્ઞસ્તુરીય ઇતિવૃત્તિભિઃ ।
અથેન્દ્રિયાશયજ્ઞાનૈર્ભગવાન્ પરિભાષ્યતે ॥ ૩૬૨॥

અઙ્ગોપાઙ્ગાયુધાકલ્પૈર્ભગવાન્ તચ્ચતુષ્ટયમ્ ।
વિભર્ત્તિ સ ચતુર્મૂર્ત્તિર્ભગવાન્ હરિરીશ્વરઃ ॥ ૩૬૩॥

શ્રીમદ્ભાગવતે ચૈવં ચતુર્વ્યૂહાઃ પ્રકીર્ત્તિતાઃ ।
જાગ્રદાદિનિવૃત્ત્યર્થમુપાસ્યા વ્યૂહમૂર્ત્તયઃ ॥ ૩૬૪॥

વાસુદેવાદયશ્ચાથ ચત્વારસ્તચ્ચતુષ્ટયાત્ ।
અષ્ટાવથ ચ સઞ્જાતા વ્યૂહાસ્તેભ્યશ્ચતુષ્ટયાત્ ॥ ૩૬૫॥

અચ્યુતોઽધોક્ષજશ્ચાથ નૃસિંહઃ પુરુષોત્તમઃ ।
ઉપેન્દ્રશ્ચ હરિશ્ચાથ કૃષ્ણશ્ચાથ જનાર્દનઃ ॥ ૩૬૬॥

સઞ્જાતાશ્ચ ત્રયો વ્યૂહા વ્યૂહાચ્છ્રીવાસુદેવતઃ ।
કેશવસંજ્ઞશ્ચાથ નારાયણાશ્ચ માધવઃ ॥ ૩૬૭॥

ત્રયો વ્યૂહાશ્ચ સઞ્જાતા વ્યૂહાત્ સઙ્કર્ષણાદથ ।
ગોવિન્દસંજ્ઞકશ્ચાથ વિષ્ણુશ્ચ મધૂસૂદનઃ ॥ ૩૬૮॥

વ્યૂહા જાતાસ્ત્રયશ્ચાથ વ્યૂહાત્ પ્રદ્યુમ્નતઃ કિલ ।
શ્રી ત્રિવિક્રમસંજ્ઞશ્ચ વામનઃ શ્રીધરસ્તદા ॥ ૩૬૯॥

અનિરુદ્ધાચ્ચ સઞ્જાતાસ્ત્રયો વ્યૂહાસ્તથૈવ ચ ।
પદ્મનામો હૃષીકેશઃ શ્રીમદ્દામોદરસ્તથા ॥ ૩૭૦॥

વ્યૂહસ્ય ચૈકસંજ્ઞસ્ય વિભિન્નસંહિતાસુ ચ ।
કલ્પભેદેન નિર્વાહ્યા વિભિન્નકારણાદયઃ ॥ ૩૭૧॥

શાર્ઙ્ગધન્વા હૃષીકેશઃ પુરુષઃ પુરુષોત્તમઃ ।
અજિતઃ ખડ્ગધૃગ્ વિષ્ણુઃ કૃષ્ણશ્ચૈવ વૃહદ્બલઃ ॥ ૩૭૨॥

સેનાનીર્ગ્રામણીશ્ચ ત્વં બુદ્ધિઃ સત્ત્વં ક્ષમા દમઃ ।
પ્રભવશ્ચાપ્યયશ્ચ ત્વમુપેન્દ્રો મધુસૂદનઃ ॥ ૩૭૩॥

પ્રભવશ્ચાપ્યયશ્ચ ત્વં પદ્મનાભો રણાન્તકૃત્ ।
શ્રીમદ્રામાયણે ચૈવં વ્યૂહા રામાત્ પ્રકીર્તિતાઃ ॥ ૩૭૪॥

“જ્ઞાનાદિગુણસામાન્યે વાસુદેવઃ પ્રકીર્ત્તિતઃ ।
સઙ્કર્ષણો વાસુદેવાત્ તસ્માત્ પ્રદ્યુમ્નસંજ્ઞિતઃ ॥ ૩૭૫॥

પ્રદ્યુમ્નાદનિરુદ્ધોઽભૂત્ સર્વ એતે ચતુર્ભુજાઃ ।
મૂર્તિભ્યશ્ચ ચતુર્ભ્યશ્ચ ચતુર્વિંશતિમૂર્ત્તયઃ ॥ ૩૭૬॥

જાયન્તે ક્રમશો બ્રહ્મન્ દીપાદ્ દીપાન્તરં યથા ।
સર્વેચતુર્ભુજાઃ પદ્મશઙ્ખચક્રગદાધરાઃ ॥ ૩૭૭॥

વાસુદેવાદાદિદેવાત્ પ્રથમાત્ કેશવસ્તથા ।

નારાયણો માધવશ્ચ જજ્ઞિરે ભૂસુરોત્તમ ॥ ૩૭૮॥

સઙ્કર્ષણાચ્ચ ગોવિન્દો વિષ્ણુશ્ચ મધુસૂદનઃ ।
ત્રયસ્તે સમજાયન્ત પ્રદ્યુમ્નાચ્ચ ત્રિવિક્રમઃ ॥ ૩૭૯॥

વામનઃ શ્રીધરશ્ચૈતે જજ્ઞિરે મુનિસત્તમ ।
અનિરુદ્ધાદ્ હૃષીકેશઃ પદ્મનાભશ્ચ સુવ્રત ॥ ૩૮૦॥

દામોદરશ્ચ તેનેત્થં દ્વાદશાંશાઃ પ્રજજ્ઞિરે ।
ઇતિ પદ્મસંહિતાયાં વ્યૂહા દ્વાદશ કીર્ત્તિતાઃ ॥ ૩૮૧॥

કેશવસ્તુ સુવર્ણાભઃ શઙ્ખચક્રગદાધરઃ ।
શુક્લામ્બરધરઃ સૌમ્યો મુક્તાભરણભૂષિતઃ ॥ ૩૮૨॥

નારાયણો ઘનશ્યામઃ શઙ્ખચક્રગદાઽસિભૃત્ ।
પીતવાસા મણિમયૈર્ભૂષણૈરુપશોભિતઃ ॥ ૩૮૩॥

માધવશ્ચોત્પલપ્રખ્યશ્ચક્રશાર્ઙ્ગગદાઽસિભૃત્ ।
ચિત્રમાલ્યામ્બરધરઃ પુણ્ડરીકનિભેક્ષણઃ ॥ ૩૮૪॥

ગોવિન્દઃ શશિવર્ણઃ સ્યાત્ પદ્મશઙ્ખગદાઽસિભૃત્ ।
રક્તારવિન્દપાદાબ્જસ્તપ્ત કાઞ્ચનભૂષણઃ ॥ ૩૮૫॥

ગૌરવર્ણો ભવેદ્વિષ્ણુશ્ચક્રશઙ્ખહલાસિભૃત્ ।
ક્ષૌમામ્બરધરઃ સ્રગ્વી કેયૂરાઙ્ગદભૂષિતઃ ॥ ૩૮૬॥

અરવિન્દનિભઃ શ્રીમાન્ મધુજિત્ કમલાસનઃ ।
ચક્રં શાર્ઙ્ગ ચ મુશલં પદ્મં દોર્ભિર્વિભર્ત્યસૌ ॥ ૩૮૭॥

ત્રિવિક્રમો રક્તવર્ણઃ શઙ્ખચક્રગદાસિભૃત્ ।
કિરીટહારકેયૂરકુણ્ડલૈશ્ચ વિરાજિતઃ ॥ ૩૮૮॥

શ્રીવામનઃ કુન્દવર્ણઃ પુણ્ડરીકાયતેક્ષણઃ ।
દોર્ભિર્વજ્રં ગદાં ચક્રં પદ્મં હૈમં વિભર્ત્ત્યસૌ ॥ ૩૮૯॥

શ્રીધરઃ પુણ્ડરીકાખ્યશ્ચક્રશાર્ઙ્ગી ચ પદ્મધૃક્ ।
રક્તારવિન્દનયનો મુક્તાદામવિભૂષિતઃ ॥ ૩૯૦॥

વિદ્યુદ્વર્ણો હૃષીકેશશ્ચક્રશાર્ઙ્ગહલાસિભૃત્ ।
રક્તમાલ્યામ્બરધરઃ પુણ્ડરીકાવતંસકઃ ॥ ૩૯૧॥

ઇન્દ્રનીલનિભશ્ચક્રશઙ્ખપદ્મગદાધરઃ ।
પદ્મનાભઃ પીતવાસાશ્ચિત્રમાલ્યાનુલેપનઃ ॥ ૩૯૨॥

દામોદરઃ સાર્વભૌમઃ પદ્મશાર્ઙ્ગાસિશઙ્ખભૃત્ ।
પીતવાસા વિશાલાક્ષો નાનારત્નવિભૂષિતઃ ॥ ૩૯૩॥

વ્યૂહા દ્વાદશધા ચૈવં હારીતસ્મૃતિવર્ણિતાઃ ।
બોદ્ધવ્યા હિ જનૈર્દિવ્યા વ્યૂહતત્ત્વબુભુત્સુભિઃ ॥ ૩૯૪॥

(ગુણયુગ્મત્રયાદ્ વ્યૂહત્રયાવિર્ભાવઃ)
તત્ર જ્ઞાનબલદ્વન્દ્વાદ્ રૂપં સાઙ્કર્ષણં હરેઃ ।
ઐશ્વર્યવીર્યસમ્ભેદાદ્ રૂપં પ્રાદ્યુમ્નમુચ્યતે ॥ ૩૯૫॥

શક્તિતેજઃ સમુત્કર્ષાદાનિરુદ્ધો તનુર્હરેઃ ।
એતે શક્તિમયાવ્યૂહા ગુણોન્મેષસ્વલક્ષણાઃ ॥ ૩૯૬॥

(વ્યૂહત્રયેઽપિ ષાડ્ગુણ્યાનુવૃત્તિઃ)
ષાડ્ગુણ્યવિગ્રહા દેવાઃ પુરુષાઃ પુષ્કરેક્ષણાઃ ।
તત્ર તત્રાવશિષ્ટં યદ્ગુણાનાં દ્વિયુગં મુને ॥ ૩૯૭॥

(ત્રિધા ચાતુરાત્મ્યસ્થિતિઃ)
અનુવૃત્તિં ભજત્યેવ તત્ર તત્ર યથાયથમ્ ।
વ્યાપ્તિમાત્રં ગુણોન્મેષો મૂર્તિકાર ઇતિ ત્રિધા ॥ ૩૯૮॥

(સઙ્કર્ષણસ્ય કૃત્યમ્)
ચાતુરાત્મ્ય સ્થિતિર્વિષ્ણોર્ગુણવ્યતિકરોદ્ભવા ।
તત્ર જ્ઞાનમયત્વેન દેવઃ સઙ્કર્ષણો બલી ॥ ૩૯૯॥

પ્રદ્યુમ્નસ્ય કૃત્યં ઃ
વ્યનક્ત્યૈકાન્તિકં માર્ગં ભગવત્પ્રાપ્તિસાધનમ્ ।
વીર્યૈશ્વર્યમયો દેવઃ પ્રદ્યુમ્નઃ પુરુષોત્તમઃ ॥ ૪૦૦॥

(અનિરુદ્ધસ્ય કૃત્યમ્)
સ્થિતઃ શાસ્ત્રાર્થભાવેન ભગવત્પ્રાપ્તિવર્ત્મના ।
શાસ્ત્રાર્થસ્ય ફલં યત્ તદ્ ભગવત્પ્રાપ્તિલક્ષણમ્ ॥ ૪૦૧॥

પ્રાપયત્યનિરુદ્ધઃ સન્ સાધકાન્ પુરુષોત્તમઃ ।
શાસ્ત્રશાસ્ત્રાર્થતત્સાધ્યફલનિર્વાહકા ઇમે ॥ ૪૦૨॥

(પરવાસુદેવેન સહ વ્યૂહસ્ય ચાતુરાત્મ્યમ્)
પુરુષાઃ પુણ્ડરીકાક્ષા વ્યૂહાઃ શક્તિમયા હરેઃ ।
ભગવાન્ વાસુદેવશ્ચ વ્યૂહાશ્ચૈતે ત્રયો મુને ॥ ૪૦૩॥

(ગુણોન્મેષસ્વરૂપપ્રદર્શનમ્)
ચાતુરાત્મ્યમિદં વિદ્ધિ વ્યક્તાવ્યક્તસ્વલક્ષણમ્ ।
ગુણાઃ શક્તિમયા યે તે જ્ઞાનૈશ્વર્યબલાદયઃ ॥ ૪૦૪॥

તેષાં યુગપદુન્મેષઃ સ્તૈમિત્યવિરહાત્મકઃ ।
સઙ્કલ્પકલ્પિતો વિષ્ણોર્યઃ સ તદ્વ્યક્તિલક્ષણઃ ॥ ૪૦૫॥

ભગવાન્ વાસુદેવઃ સ પરમા પ્રકૃતિશ્ચ સા ।
શક્તિર્યા વ્યાપિનો વિષ્ણોઃ સા જગત્પ્રકૃતિઃ પરા ॥ ૪૦૬॥

(સિસૃક્ષોર્વાસુદેવાત્ સઙ્કર્ષણાવિર્ભાવઃ)
શક્તેઃ શક્તિમતો ભેદાદ્ વાસુદેવ ઇતીર્યતે ।
સર્વશક્તિમયો દેવો વાસુદેવઃ સિસૃક્ષયા ॥ ૪૦૭॥

(તત્ર દૃષ્ટાન્તઃ)
વિભજત્યાત્મનાઽઽત્માનં યઃ સ સઙ્કર્ષણઃ સ્મૃતઃ ।
ભાવાનુદયશૈલસ્થે પ્રભા યદવદ્ વિજૃમ્ભતે ॥ ૪૦૮॥

(તસ્ય ષોડશશતવર્ષપ્રતીક્ષણમ્)
ઉદયસ્થે તથા દેવે પ્રભા સઙ્કર્ષણાત્મિકા ।
અવ્યાપૃતા શતાન્યેષા શક્તિસ્તિષ્ઠતિ ષોડશ ॥ ૪૦૯॥

સઙ્કર્ષણાત્મિકા સાક્ષાદ વિજ્ઞાનબલવારિધિઃ ।
અનન્તો ભગવાન્ વિષ્ણુઃ શક્તિમાન્ પુરુષોત્તમઃ ॥ ૪૧૦॥

પૂર્ણસ્તિમિતષાડ્ગુણ્યો નિસ્તરઙ્ગાર્ણવોપમઃ ।
ષણ્ણાં યુગપદુન્મેષાદ્ ગુણાનાં સ્વપ્રચોદિતાત્ ॥ ૪૧૧॥

અનન્ત એવ ભગવાન્ વાસુદેવઃ સનાતનઃ ।
તત્ર જ્ઞાનબલોન્મેષાત્ સ્વસઙ્કલ્પપ્રચોદિતાત્ ॥ ૪૧૨॥

(પ્રદ્યુમ્નાવિર્ભાવઃ)
અનન્ત એવ ભગવાન્ દેવઃ સઙ્કર્ષણોઽચ્યુતઃ ।
સ્થિત્વા ષોડશવર્ષાણિ દેવઃ શક્તિમયોઽચ્યુતઃ ॥ ૪૧૩॥

અનન્ત એવ ભગવાન્ પ્રદ્યુમ્નઃ પુરુષોત્તમઃ ।
અંશાંશેનોદિતા શક્તિઃ પ્રાદ્યુમ્ની ભગવત્પ્રભા ॥ ૪૧૪॥

(અનિરુદ્ધાવિર્ભાવઃ)
અવ્યાપૃતા શતાન્યેષા તુષ્ણીં તિષ્ઠતિ ષોડશ ।
તતઃ શક્તિમયો દેવઃ પ્રદ્યુમ્નઃ પુરુષોત્તમઃ ॥ ૪૧૫॥

શતાનિ ષોડશ સ્થિત્વા સ્વસઙ્કલ્પપ્રચોદિતઃ ।
અનન્ત એવ ભગવાનનિરુદ્ધો ભવત્યુત ॥ ૪૧૬॥

અંશાંશેનોદિતા શક્તિરાનિરુદ્ધી હરેઃ પ્રભા ।
અવ્યાપૃતા શતાન્યેષા તુષ્ણીં તિષ્ઠતિ ષોડશ ॥ ૪૧૭॥

(વ્યૂહસ્ય ષોડશશતવર્ષાનન્તરં સૃષ્ટૌ વ્યાપૃતિઃ)
શતાનિ ષોડશ સ્થિત્વાઽનિરુદ્ધઃ શક્તિમાનસૌ ।
તદા વ્યાપ્રિયતે સૃષ્ટૌ પૂર્વાભ્યાં સહ નારદ ॥ ૪૧૮॥

(વ્યૂહાનાં હેયપ્રતિભટત્વમનાદિત્વં ચ)
વ્યૂહા એતે વિશાલાક્ષાશ્ચત્વારઃ પુરુષોત્તમાઃ ।
નિર્દોષા નિરનિષ્ઠાશ્ચ નિરવદ્યાઃ સનાતનાઃ ॥ ૪૧૯॥

અનન્તરમક્ષરં ચૈતચ્ચાતુરાત્મ્યં મહામુને ।
નિસ્તરઙ્ગદશાયાં તે નિઃસક્તાઃ સક્તચિન્મયાઃ ॥ ૪૨૦॥

શક્ત્યાત્મકા ગુણોન્મેષદશાયાં તે વ્યવસ્થિતાઃ ।
તત્ર સ્થૂલદશાયાં તે વ્યક્તિભાવમુપાગતાઃ ॥ ૪૨૧॥

(ચાતુરાત્મ્યસ્ય મનાલમ્બનાર્થત્વમ્)
જગતામુપકારાય સચ્ચિદાનન્દલક્ષણાઃ ।
મનાલમ્બનાયૈષા ચાતુરાત્મ્યવ્યવસ્થિતિઃ ॥ ૪૨૨॥

(વ્યૂહાદ્ વ્યૂહાન્તરાવિર્ભાવઃ)
આમ્નાસિષુરમુષ્યાશ્ચ રહસ્યામ્નાયવેદિનઃ ।
વ્યૂહાન્તરવિભવાદીન્ ભેદાન્ સઙ્કલ્પકલ્પિતાન્ ॥ ૪૨૩॥

(દ્વાદશ વ્યૂહાન્તરાણિ)(વાસુદેવાદેઃ કેશવાદયઃ)
વ્યૂહાન્તરં દશ દ્વે ચ કેશવાદ્યાઃ પ્રકીર્તિતાઃ ।
કેશવાદિત્રયં તત્ર વાસુદેવાદ્ વિભાવ્યતે ॥ ૪૨૪॥

સઙ્કર્ષણાચ્ચ ગોવિન્દપૂર્વં ત્રિતયમદ્ભુતમ્ ।
ત્રિવિક્રમાદ્યં ત્રિતયં પ્રદ્યુમ્નાદુદિતં મુને ॥ ૪૨૫ ॥

(વ્યૂહાન્તરસ્ય ત્રૈવિધ્યમ્)
હૃષીકેશાદિકં તદ્વદનિરુદ્ધાન્ મહામુને ।
પરાઃ સ્વકારણાન્તસ્થાઃ સૂક્ષ્માસ્તે દ્વિભુજાઃ સ્મૃતાઃ ॥ ૪૨૬ ॥

ચતુર્ભુજાસ્તે વિજ્ઞેયાઃ સ્થૂલાસ્ત્રિભુવનેશ્વરાઃ ।
ચક્રાદ્યાયુધવિન્યાસો યન્ત્રતન્ત્રેઽભિધાસ્યતે ॥ ૪૨૭ ॥

(અથ કેશવાદિસ્વરૂપવર્ણનમ્)
તપ્તજામ્બૂનદપ્રખ્યં પુણ્ડરીકાયતેક્ષણમ્ ।
અપારકરુણં પદ્મશઙ્ખચક્રગદાધરમ્ ॥ ૪૨૮ ॥

પીતામ્બરધરં દેવં વનમાલાવિભૂષિતમ્ ।
હારકેયૂરકટકકુણ્ડલૈરૂપશોભિતમ્ ॥ ૪૨૯ ॥

ચતુર્બાહુસદારાઙ્ગં પ્રસન્નવદનં વિભુમ્ ।
પ્રાગાદિ વિન્યસેદ્ દેવં કેશવં ક્લેશનાશનમ્ ॥ ૪૩૦ ॥

શઙ્ખપદ્મચક્રગદાધરં નીલામ્બુદચ્છવિમ્ ।
સર્વાલઙ્કારસંયુક્તં કુર્યાન્નારાયણં તતઃ ॥ ૪૩૧ ॥

પદ્મકૌમોદકીશઙ્ખચક્ર ધારિણમવ્યયમ્ ।
દેવમિન્દીવરશ્યામં માધવં ભાવયેત્ તતઃ ॥ ૪૩૨ ॥

ચક્રકૌમોદકીશઙ્ખપદ્માયુધવિરાજિતમ્ ।
ઇન્દુબિમ્બનિભં કુર્યાત્ ગોવિન્દમમિતૈજસમ્ ॥ ૪૩૩ ॥

ગદાબ્જશઙ્ખચક્રાસ્ત્રધરં પરમભૂષિતમ્ ।
વિષ્ણું વિશ્વપતિં કુર્યાત્ પદ્મકિઞ્જલ્કસન્નિભમ્ ॥ ૪૩૪ ॥

ચક્રશઙ્ખામ્બુજગદાધારિણં કરુણાનિધિમ્ ।
રક્તપદ્મદલપ્રખ્યં તં કુર્વીત ત્રિવિક્રમમ્ ॥ ૪૩૫ ॥

શઙ્ખચક્રગદાપદ્મધરં પરમભૂષિતમ્ ।
તરુણાદિત્યસઙ્કાશં વામનં ભાવયેત્ તતઃ ॥ ૪૩૬ ॥

પદ્મચક્રગદાશઙ્ખધરં સદ્ગુણસાગરમ્ ।
પુણ્ડરીકનિભં દેવં શ્રીધરં પરિકલ્પયેત્ ॥ ૪૩૭ ॥

ગદાસુદર્શનયુતે શઙ્ખપદ્મે ચ વિભ્રતમ્ ।
વિદ્યુત્પ્રભં હૃષીકેશં કુર્વીત કમલેક્ષણમ્ ॥ ૪૩૮॥

શઙ્ખપદ્મે ગદાચક્રે તથા વિભ્રાણમુજ્વલમ્ ।
સહસ્રાદિત્યસઙ્કાશં પદ્મનાભં તુ કારયેત્ ॥ ૪૩૯॥

પદ્મશઙ્ખગદાચક્રધરં બન્ધૂકસન્નિભમ્ ।
ભક્ત્યેકસુલભં દેવં દામોદરમથ સ્મરેત્ ॥ ૪૪૦॥

કેશવાદેશ્ચ રૂપાણિ ચેત્યેવં દર્શિતાનિ હિ ।
અહિર્બુધ્ન્યસંહિતાયાં બોધ્યાન્યેતાનિ યત્નતઃ ॥ ૪૪૧॥

(અથ વ્યૂહલોકાઃ)
શ્રીસાકેતાદધઃસ્થશ્ચ શ્રીગોલોકો હિ સંસ્થિતઃ ।
શ્રીનારાયણલોકશ્ચ તદધસ્તાદ્ વિરાજિતઃ ॥ ૪૪૨॥

તદધસ્તાદ્ વાસુદેવવ્યૂહલોકો હિ વર્ત્તતે ।
ભગવાન્ વાસુદેવો હિ સઙ્કર્ષણાદિકારણમ્ ॥ ૪૪૩॥

વિરાજતે ચતુર્ભુજઃ શઙ્ખચક્રગદાધરઃ ।
વાસુદેવાદધઃસ્થશ્ચ લોકઃ સઙ્કર્ષણસ્ય હિ ॥ ૪૪૪॥

યત્ર નીલામ્બરધરો વ્યૂહઃ સઙ્કર્ષણઃ સ્થિતઃ ।
શુદ્ધસ્ફટિકતુલ્યોઽસૌ રક્તપદ્મનિભેક્ષણઃ ॥ ૪૪૫॥

દિવ્યગન્ધાનુલિપ્તાઙ્ગો હલહસ્તશ્ચતુર્ભુજઃ ।
વાસુદેવસ્ય શેષશ્ચ હ્યનન્તોઽનન્તવિક્રમઃ ॥ ૪૪૬॥

કાલરુદ્રયમાદીનામન્તઃસ્થો લયકારકઃ ।
ધારયતિ ધરાં ચાસૌ જ્ઞાનબલસમન્વિતઃ ॥ ૪૪૭॥

પ્રદ્યુમ્નવ્યૂહલોકસ્તુ સ્થિતઃ સઙ્કર્ષણાદધઃ ।
પ્રદ્યુમ્નો રાજતે યત્ર કિશોરો રક્તલોચનઃ ॥ ૪૪૮॥

જગતો મોહકશ્ચાસૌ દિવ્યભૂષણભૂષિતઃ ।
બ્રહ્માન્તઃસ્થો જગત્કર્ત્તા વીર્યૈશ્વર્યસમન્વિતઃ ॥ ૪૪૯॥

અધોલોકસ્તુ પ્રદ્યુમ્નાદનિરુદ્ધસ્ય કીર્તિતઃ ।
શક્તિતેજોયુતો વ્યૂહો યત્રાનિરુદ્ધસંજ્ઞકઃ ॥ ૪૫૦॥

અન્તર્યામી સ મન્વાદેર્જગતઃ પાલકો મતઃ ।

વશિષ્ઠસંહિતાયાં હિ વ્યૂહલોકા મતા ઇતિ ॥ ૪૫૧॥

એવં તત્તદ્વ્યૂહલોકાસ્તત્તલ્લોકાદધસ્તનાઃ ।
સ્વસ્વાચાર્યૈશ્ચ વિજ્ઞેયા અલં પલ્લવિતેન તત્ ॥ ૪૫૨॥

વિભવસ્વરૂપમ્ ।
દેવાદિકવિભૂત્યાં ચ તત્તત્સાજાત્યવત્તયા ।
ભક્તાઁશ્ચ રક્ષિતું રામાવિર્ભાવો વિભવો મતઃ ॥ ૪૫૩॥

અજાયમાનો બહુધા શ્રુતેરત્રપ્રમાણતા ।
ન કર્મફલભોગાર્થઃ સ ત્વૈચ્છિકસ્તનુગ્રહઃ ॥ ૪૫૪॥

અજોઽપિ સન્નવ્યયાત્મા ભૂતાનામીશ્વરોઽપિ સન્ ।
પ્રકૃતિં સ્વામધિષ્ઠાય સમ્ભવામ્યાત્મમાયયા ॥ ૪૫૫॥

યદા યદા હિ ધર્મગ્લાનિર્ભવતિ ભારત ।
અભ્યુત્થાનમધર્મસ્ય તદાત્માનં સૃજામ્યહમ્ ॥ ૪૫૬॥

પરિત્રાણાય સાધૂનાં વિનાશાય ચ દુષ્કૃતામ્ ।
ધર્મસંસ્થાપનાર્થાય સમ્ભવામિ યુગે યુગે ॥ ૪૫૭॥

જન્મ કર્મ ચ મે દિવ્યમેવં યો વેત્તિ તત્ત્વતઃ ।
ત્યક્ત્વા દેહં પુનર્જન્મ નૈતિ મામેતિ સોઽર્જુન ॥ ૪૫૮॥

શ્રીમદ્ભગવદ્ગીતાયામેવમભિહિતં યતઃ ।
પ્રાકૃતજન્મભિન્નં તદ્ ભગવજ્જન્મ સમ્મતમ્ ॥ ૪૫૯॥

યથાર્થજ્ઞાનતઃ સ્વસ્ય દિવ્યં જન્મ તદૈશ્વરમ્ ।
પરમોપાયભૂતં તદ્ સન્તારકં ભવામ્બુધેઃ ॥ ૪૬૦॥

અવજાનન્તિ માં મૂઢા માનુષીં તનુમાશ્રિતમ્ ।
પરં ભાવમજાનન્તો મમ ભૂતમહેશ્વરમ ॥ ૪૬૧॥

મોઘાશા મોઘકર્માણો મોઘજ્ઞાના વિચેતસઃ ।
રાક્ષસીમાસુરીં ચૈવ પ્રકૃતિં મોહિનીં શ્રિતાઃ ॥ ૪૬૨॥

તાનહં દ્વિષતઃ ક્રૂરાન સંસારેષુ નરાધમાન્ ।
ક્ષિપાભ્યજસ્રમશુભાનાસુરીષ્વેવ યોનિષુ ॥ ૪૬૩॥

આસુરીં યોનિમાપન્ના મૂઢા જન્મનિ જન્મનિ ।
મામપ્રાપ્યૈવ કૌન્તેય ! તતો યાન્ત્યધમાં ગતિમ્ ॥ ૪૬૪॥

અવ્યક્તં વ્યક્તિમાન્નં મન્યન્તે મામબુદ્ધયઃ ।
પરં ભાવમજાન્તો મમાવ્યયમનુત્તમમ્ ॥ ૪૬૫॥

નાહં પ્રકાશઃ સર્વસ્ય યોગમાયાસમાવૃતઃ ।
મૂઢોઽયં નાભિજાનાતિ લોકો મામજમવ્યયમ્ ॥ ૪૬૬॥

અવતારસ્ય ચાવજ્ઞાં કુર્વન્ત્યાસુરબુદ્ધયઃ ।
તેષાં ભગવતા પ્રોક્તા ગીતાયામધમા ગતિઃ ॥ ૪૬૭॥

અવતારચરિત્રાણિ તારકાણિ ભવાર્ણવાત્ ।
વૈરાગ્યં જનયિત્વા ચ ભક્તેઃ સંવર્ધકાનિ હિ ॥ ૪૬૮॥

બ્રહ્મણો નનુ રામસ્ય નિરાકારાવતારિણઃ ।
કથઙ્કારં ભવેદત્ર સાકારાત્માવતારતા ॥ ૪૬૯॥

ઇતિ ચેન્ન કુતો યસ્માત્ કાષ્ઠવ્યાપ્તોઽનલઃ ખલુ ।
કાષ્ઠસ્યાકારતાં યાતિ પ્રાકટ્યે હિ યથા તથા ॥ ૧૭૦॥

અગ્નિર્યથૈક ઇત્યાદેઃ શ્રુતેરત્ર પ્રમાણતા ।
તસ્ય યથા કપ્યાસં પુણ્ડરીકમેવમક્ષિણી ॥ ૪૭૧॥

આપ્રણખાત્ સર્વ એવ સુવર્ણશ્ચેતિ વાક્યતઃ ।
રામે બ્રહ્મણિ કિઞ્ચૈવં દિવ્યા સાકારતા શ્રુતા ॥ ૪૭૨॥

અચક્ષુશ્ચેતિબાધસ્તુ પ્રાકૃતસ્યૈવ ચક્ષુષઃ ।
તસ્ય યથા શ્રુતેર્માનાન્નતુ દિવ્યસ્ય ચક્ષુષઃ ॥ ૪૭૩॥

તદભાવો ન તલ્લોકે હ્યવતારગ્રહેઽપિ ચ ।
રામસ્ય બ્રહ્મણો યસ્માત્ સર્વત્ર પરિપૂર્ણતા ॥ ૪૭૪॥

કદાપિ પ્રકૃતેઃ સઙ્ગો રામસ્ય મોહકો ન હિ ।
ભવતો રાઘવાદેવ સ્મૃતિજ્ઞાનવ્યપોહને ॥ ૪૭૫॥

સ્વરૂપેણ સ્વભાવેન શરીરેણાપિ નિર્મલઃ ।
સર્વાવસ્થાસુ રામો હિ માલિન્યં સમુપૈતિ ન ॥ ૪૭૬॥

રામાંશોઽપિ પ્રકારત્વાજ્જીવો બદ્ધઃ સ્વકર્મભિઃ ।
જીવસંસારમાલિન્યં ભાસતે કર્મબન્ધનાત્ ॥ ૪૭૭॥

ઉપૈતિ બ્રહ્મસાદૃશ્યં બ્રહ્માહમિતિ ભાવયન્ ।

વિમુક્તઃ કર્મણા જીવસ્તદા ભવતિ નિર્મલઃ ॥ ૪૭૮॥

સંસારો ભાસતે જીવે રામાંશે મોહતઃ ખલુ ।
અવતારસ્વરૂપે તુ લોકદૃષ્ટ્યા ન મોહતઃ ॥ ૪૭૯॥

અનંશે રાઘવે પૂર્ણે બ્રહ્મણિ સર્વશેષિણિ ।
માલિન્યં ન સ્વભાવેન શેષયોસ્તત્ત્વતો ન હિ ॥ ૪૮૦॥

ઉભ્ભાવંશૌ તરઙ્ગૌ ચ હ્યતરઙ્ગસ્તુ રાઘવઃ ।
નિરાકુલઃ સ સંસારાદવતારી પરેશ્વરઃ ॥ ૪૮૧॥

પ્રકૃતેઃ સઙ્ગતો જીવો સત્વાદિત્રિગુણોઽસ્તિ હિ ।
મુક્તૌ તુ નિર્ગુણઃ સોઽથ ગુણત્રયવિમોચનાત્ ॥ ૪૮૨॥

સ્વપ્રપન્નસ્ય રામો હિ ગુણત્રયવિમોચકઃ ।
રામસ્તુ નિર્ગુણો નિત્યં પ્રકૃતિસઙ્ગવર્જિતઃ ॥ ૪૮૩॥

સગુણશ્ચ પરો રામો દિવ્યાનન્તગુણાર્ણવઃ ।
અંશવ્યાવર્ત્તકં રામે નિર્ગુણેતિ વિશેષણમ્ ॥ ૪૮૪॥

રામાંશસ્ય તુ જીવસ્ય ગુણમોહાદ્ધિ સંસૃતિઃ ।
અવતારેઽન્યદૃષ્ટ્યા તુ ભાસિતં બન્ધનં નહિ ॥ ૪૮૫॥

રામસ્ય સગુણાંશમ્ય સગુણત્વ નિવૃત્તયે ।
નિર્ગુણશ્ચાપિ રામાંશોઽવતારો ગુણવાનિવ ॥ ૪૮૬॥

દિવ્યાદિવ્યવિભૂત્યોશ્ચ સ્વામી રામોઽખિલેશ્વરઃ ।
સર્વશક્તિઃ સ એવાથ તદ્દ્વયં ચ વિભર્ત્તિ હિ ॥ ૪૮૭॥

સમષ્ટિવ્યષ્ટિદેહત્વાદ્ રામે માનં હિ ભાસતે ।
ઉભ્યોરાત્મભૂતસ્તુ રામોઽનન્તશ્ચ નિર્ગુણઃ ॥ ૪૮૮॥

અગમ્યશ્ચાથ ગમ્યશ્ચ શ્રીમદ્રામઃ પ્રકીર્ત્તિતઃ ।
ભક્તિશૂન્યૈરગમ્યઃ સ ગમ્યો ભક્તૈર્મુમુક્ષુભિઃ ॥ ૪૮૯॥

ગુરુશાસ્ત્રોપદેશાચ્ચ સંશયસ્ય ચ સક્ષયાત્ ।
તસ્મિન્ ન્યસ્તધિયો ભક્તાસ્તદ્ગતિં પ્રાપ્નુવન્તિ હિ ॥ ૪૯૦॥

વદન્તિ મલિનં રામં મલિના રામમાયયા ।
ભવન્તિ નિર્મલા ભક્ત્યા રામ વિજ્ઞાય નિર્મલમ્ ॥ ૪૯૧॥

નિર્મલં હિ સ્વભાવેન સદ્ગુરોઃ કૃપયા જનાઃ।
લીલાર્થમનુકર્ત્તારં રામં વિદન્તિ તિત્વતઃ ॥ ૪૯૨॥

મત્સ્યઃ પાણોશ્રુતાવસ્યાં મત્સ્યઃ શતપથે શ્રુતઃ ।
સ યત્કૂર્મઃ શ્રુતાવેવં કૂર્મઃ શતપથે મતઃ ॥ ૪૯૩॥

વરાહો ભૂત્વાઽહરચ્ચે વ તૈત્તિરીયે વરાહકઃ ।
નૃસિંહસ્તૈત્તિરીયે હિ તન્નો નરસિંહસ્ત્વિતિ ॥ ૪૯૪॥

ઋગ્વેદે વામનઃ પ્રોક્ત ઇદં વિષ્ણુર્વિચક્રમે ।
વિપ્રસ્તરતિ ચેત્યેવં જામદગ્ન્ય ઉદીરિતઃ ॥ ૪૯૫॥

અભિરામમસ્થાદિતિ શ્રીરામશ્ચાભિભાષિતઃ ।
કૃષ્ણન્ત એમ ઇત્યેવં શ્રીકૃષ્ણશ્ચાપિ વ્યાહૃતઃ ॥ ૪૯૬॥

એવઞ્ચૈશાવતારત્વે પ્રોક્તા વેદપ્રમાણતા ।
અવૈદિકી તતો જ્ઞેયા હ્યવતારાપ્રમાણતા ॥ ૪૯૭॥

મત્સ્યાઃ કૂર્મો વરાહશ્ચ કપિલર્ષિસ્તથા નરઃ।
નારદ ઋષભો યજ્ઞો દત્તાત્રેયોઽથ મોહિની ॥ ૪૯૮॥

નૃસિંહો વામનો વ્યાસો જામદગ્ન્યશ્ચ રાઘવઃ ।
બલરામોઽથ કૃષ્ણશ્ચ પર ધન્વન્તરિર્હરિસ્તથા ॥ ૪૯૯॥

હંસઃ સનત્કુમારશ્ચ કલ્કિર્બુદ્ધઃ પૃથુસ્તથા ।
ચતુર્વિંશતિસઙ્ખ્યાકા વિભવાઃ સમ્પ્રકીર્તિતાઃ ॥ ૫૦૦॥

શ્રીમદ્ભાગવતે ચૈષાં વેદ્યં વૃત્તં વિશેષતઃ ।
વૃત્તં રામાયણેવેદ્યં શ્રીરામસ્યાવતારિણઃ ॥ ૫૦૧॥

શ્રીભગવચ્ચરિત્રાણાં કથનાચ્છ્રવણાદપિ ।
નરો યાતિ હિ તદ્ધામ યદ્ ગત્વા ન નિવર્ત્તતે ॥ ૫૦૨॥

મુક્તયે મુક્તિકામૈશ્ચ શ્રીરામસ્યાવતારિણઃ ।
પ્રધાના વિભવા એષુ વેદ્યા મત્સ્યાદયો દશ ॥ ૫૦૩॥

રામો હિ ચૈત્રશુક્લસ્ય ચાદિમાયાં તિથૌ ખલુ ।
અન્ શ્રીમત્સ્યરૂપઃ સન્ દૈત્યં વેદાપહારકમ્ ॥ ૫૦૪॥

રામો હિ જ્યેષ્ઠશુક્લસ્ય દ્વિતીયાયાં તિથૌ ખલુ ।
કૂર્માવતારરૂપઃ સન્ મહાધીરો હ્યજાયત ॥ ૫૦૫॥

રામો હિ માઘશુક્લસ્ય સપ્તમ્યાં ચ તિથાવિહ ।
શ્રીમદ્વરાહરૂપઃ સન્ હિરણ્યાક્ષ જઘાન હિ ॥ ૫૦૬॥

રામો વૈશાખશુક્લસ્ય ચતુર્દશ્યાં તિથૌ ખલુ ।
શ્રીમન્નૃસિંહરૂપઃ સન્ હિરણ્યકશિપું વ્યહન્ ॥ ૫૦૭॥

રામો હિ શુક્લદ્વાદશ્યાં માસે ભાદ્રપદે શુભે ।
શ્રીમદ્વામનરૂપઃ સન્ પાતાલં પ્રાપયદ્ બલિમ્ ॥ ૫૦૮॥

રામો વૈશાખશુક્લસ્ય તૃતીયાયાં તિથૌ ખલુ ।
શ્રીમત્પરશુરામઃ સન્ જઘાન દુષ્ટક્ષત્રિયાન્ ॥ ૫૦૯॥

રામો હિ ચૈત્રશુક્લાયાં નવમ્યાં ચ પરઃ પુમાન્ ।
શ્રીયુતરામરૂપઃ સન્ રાવણં હતવાનિહ ॥ ૫૧૦॥

રામો ભાદ્રપદસ્યાથ કૃષ્ણાષ્ટમ્યાં તિથાવિહ ।
શ્રીયુતકૃષ્ણરૂપઃ સન્ કંસાદિકં જઘાન હિ ॥ ૫૧૧॥

રામશ્ચાષાઢ શુક્લસ્ય દશમ્યાં ચ તિથૌ કિલ ।
શ્રીમદ્બુદ્ધસ્વરૂપઃ સન્ વઞ્ચયામાસ ચાસુરાન્ ॥ ૫૧૨॥

રામઃ શુક્લદ્વિતીયાયાં માસે ચ માર્ગશીર્ષકે ।
શ્રીયુતકલ્કિરૂપઃસન્ દુષ્ટનાશં કરિષ્યતિ ॥ ૫૧૩॥

મુખ્યામુખ્યાદિભેદાચ્ચ કલાદ્યાવેશભેદતઃ ।
નાનાવિભવભેદા હિ પાઞ્ચરાત્રે પ્રકીર્તિતાઃ ॥ ૫૧૪॥

ભવાન્ નારાયણો દેવઃ શ્રીમાઁશ્ચક્રાયુધઃ પ્રભુઃ ।
એકશૃઙ્ગો વરાહસ્ત્વં ભૂતભવ્યસપત્નજિત્ ॥ ૫૧૫॥

લોકાનાં ત્વં પરો ધર્મો વિષ્વક્સેનશ્ચતુર્ભુજઃ ।
ત્વયા લોકાસ્ત્રયઃ ક્રાન્તાઃ પુરા સ્વૈવિક્રમૈસ્ત્રિભિઃ ॥ ૫૧૬॥

મહેન્દ્રશ્ચ કૃતો રાજા બલિં બધ્વા સુદારુણમ્ ।
શ્રીમદરામાયણે ચૈવં શ્રીરામાદ વિભવા મતાઃ ॥ ૫૧૭॥

રામઃ સર્વાવતારાણામવતારી સમીરિતઃ ।
પરિત્રાણં ચ સાધૂનામવતારપ્રયોજનમ્ ॥ ૫૧૮॥

સર્વેભ્યશ્ચાભયં દત્તે રામઃ સકૃત્પ્રપત્તિતઃ ।

સ્વાશ્રિતસ્યાપરાધાંશ્ચ રામઃ સ્મરતિ નૈવ હિ ॥ ૫૧૯॥

સાક્ષાદ ગૌણસ્તથાઽઽવેશ ઇત્યેવં વિભવાત્રયઃ ।
મુખ્યમુખ્યતરત્વાદિભેદાત્ સાક્ષાત્ ત્રિધા મતઃ ॥ ૫૨૦॥

નૃસિંહવામનભેદાદ દ્વિધા મુખ્યઃ પ્રકીર્ત્તિતઃ ।
મુખ્યતરશ્ચ શ્રીકૃષ્ણો રામો મુખ્યતમસ્તથા ॥ ૫૨૧॥

મત્સ્યકૂર્માદિભેદૈશ્ચ મતો ગૌણસ્ત્વનેકધા ।
કલાસ્વરૂપશક્તીનામાવેશાત્ ત્રિવિધોઽન્તિમઃ ॥ ૫૨૨॥

વિભવાશ્ચ કલાવેશાત્ પૃથુધન્વન્તરાદયઃ ।
શુદ્ધાવેશસ્તથાઽશુદ્ધાવેશો દ્વિધા ચ મધ્યમઃ ॥ ૫૨૩॥

શુદ્ધાવેશાશ્ચ વિજ્ઞેયાઃ શ્રીવ્યાસકપિલાદયઃ ।
મતા પરશુરામાદાવશુદ્ધાવેશતા બુધૈઃ ॥ ૫૨૪॥

શક્ત્યાવેશો દ્વિધા શુદ્ધાશુદ્ધત્વભેદતો મતઃ ।
આદિમોઽપિ દ્વિધા મુખ્યગૌણભેદાત પ્રકીર્ત્તિતઃ ॥ ૫૨૫॥

હંસાદયો મતા મુખ્યા ગૌણા બુદ્ધાદયો મતાઃ ।
અન્તિમોઽપિ દ્વિધા મુખ્યગૌણભેદાદુદીરિતઃ ॥ ૫૨૬॥

તત્ર બ્રહ્માદયો મુખ્યા ગૌણા મન્વાદયો મતાઃ ।
સંરક્ષકાશ્ચ સાધૂનાં ધર્મસંસ્થાપકાસ્તથા ॥ ૫૨૭॥

ઇત્યેવં વિભવાઃ પ્રોક્તાઃ પ્રમેયોદ્દેશભાસ્કરે ।
વશિષ્ઠસંહિતાવચ્છ્રીચિદાનન્દેન ભાષિતે ॥ ૫૨૮॥

રામોઽખિલાવતારાણામવતારી પરાશર ।
સાધુધર્માન્ પરિત્રાતુમાવિર્ભવતિ સોઽત્ર હિ ॥ ૫૨૯॥

રામઃ સકૃત્ પ્રપત્યૈવ સર્વભીતિહરોઽસ્તિ ચ ।
નૈવ પશ્યતિ ભક્તાનામપરાધં દયાર્ણવઃ ॥ ૫૩૦॥

સાક્ષાદ્ ગૌણસ્તથાઽઽવેશો વિભવાસ્ત્રિવિધા ઇતિ ।
મુખ્યમુખ્યતરત્વાદિભેદાત્ સાક્ષાન્મતસ્ત્રિધા ॥ ૫૩૧॥

નૃસિંહવામનશ્ચેતિ દ્વિધા મુખ્ય ઉદીરિતઃ ।
કૃષ્ણો મુખ્યતરસ્તત્ર રામો મુખ્યતમસ્તથા ॥ ૫૩૨॥

મત્સ્યકૂર્માદિભિર્ભેદૈર્ગૌણોઽનેકવિધઃ સ્મૃતઃ ।
કલાસ્વરૂપશક્તીનામાવેશાદન્તિમસ્ત્રિધા ॥ ૫૩૩॥

વિભવાશ્ચ કલાવેશાત્ પૃથુધન્વન્તરાદયઃ ।
મધ્યમસ્તુ દ્વિધા શુદ્ધાશુદ્ધાવેશાદ્ધિ સમ્મતઃ ॥ ૫૩૪॥

શુદ્ધાવેશાશ્ચચ બૌદ્ધવ્યાઃ શ્રીવ્યાસકપિલાદિકાઃ ।
શ્રીમત્પરશુરામાદાવશુદ્ધાવેશતા મતા ॥ ૫૩૫॥

શુદ્ધાશુદ્ધત્વભેદાચ્ચ શક્ત્યાવેશઃ સ્મૃતો દ્વિધા ।
મુખ્યગૌણવિભેદાચ્ચ દ્વિધૈવ ચાન્તિમઃ સ્મૃતઃ ॥ ૫૩૬॥

મુખ્યા બ્રહ્માદયસ્તત્ર ગૌણા મન્વાદયોઽથ ચ ।
શ્રીવશિષ્ઠસંહિતાયામુક્તાશ્ચ વિભવા ઇતિ ॥ ૫૩૭॥

મુખ્યા રામાવતારાસ્તુ દીપાદુત્પન્નદીપવત્ ।
શ્રીરામેણ સમાઃ કિન્તુ રામસ્યૈવાવતારિતા ॥ ૫૩૮॥

ઐશ્વર્યસ્ય હિ પ્રાકટ્યે ચાવિશ્ય ક્વચિદાત્મનિ ।
શ્રીરામગૌણતા બોધ્યા તદ્વતાં ચાનુપાસ્યતા ॥ ૫૩૯॥

અપ્રાકૃતસ્ય રૂપસ્ય પ્રાકટ્યેઽદ્વારકે ખલુ ।
શ્રીરામે મુખ્યતા તદ્વાનુપાસ્યઃ સ મુમુક્ષુભિઃ ॥ ૫૪૦॥

બ્રહ્મવિષ્ણુમહેશાદ્યા યસ્યાંશા લોકસાધકાઃ ।
તમાદિદેવં શ્રીરામં વિશુદ્ધં પરમં ભજે ॥ ૫૪૧॥

બ્રહ્મવિષ્ણુમહેશાદેરંશિતા સકલેશ્વરે ।
શ્રીરામાયણમાહાત્મ્યે રામે વ્યાસેન કીર્ત્તિતા ॥ ૫૪૨॥

ષાડ્ગુણ્યસ્ય ચ રામસ્ય સાકલ્યે પૂર્ણતા મતા ।
કલાત્વં ષોડશે ભાગે ચતુર્થાંશે તદંશતા ॥ ૫૪૩॥

ઉત્તરેણ ચરિત્રેણ શ્રીરામસ્યાવતારિણઃ ।
વર્ણિતં પૂર્ણરૂપેણ ચાવતારસ્ય કારણમ્ ॥ ૫૪૪॥

શ્રીબોધાયનગીતાયામિત્યવતાર કારણમ્ ।
સાધુસંરક્ષણં પ્રોક્તં ધર્મસંસ્થાપનં તથા ॥ ૫૪૫॥

અવતારા અનન્તાશ્ચ રામસ્ય પરમાત્મનઃ ।
સર્વશ્રેષ્ઠો મતસ્તેષુ રાઘવઃ સકલેશ્વરઃ ॥ ૫૪૬॥

અન્તઃસ્થત્વે ચ સર્વસ્ય રામે રક્ષાવિધાતૃતા ।
તત્સૃષ્ટ્વેતિ શ્રુતાવુક્તા રામાન્તર્યામિતા હિ સા ॥ ૫૪૭॥

ગુહાહિતં ગહ્વરેષ્ઠમિતિ શ્રુતિપ્રમાણતઃ ।
ધ્યાનાય વિગ્રેહેણાપિ સર્વાન્તઃસ્થો હિ રાઘવઃ ॥ ૫૪૮॥

વૈરાગ્યાભ્યાસયુક્તાનાં યોગસંસ્કૃતચેતસામ્ ।
નિષ્પન્નભક્તિયોગાનામેવ ગ્રાહ્યો ભવેદ્ધિ સઃ ॥ ૫૪૯॥

અન્તઃ પ્રવિષ્ટઃ શાસ્તેતિ શ્રીરામેઽન્તઃસ્થતા શ્રુતા ।
જગત્ સર્વં શરીરં તે સર્વાત્મતેતિ રાઘવે ॥ ૫૫૦॥

યોઽન્તરાત્મા હિ સર્વેષાં શ્રીરામઃ શરણં મમ ।
ઇત્યાદ્યાગમવાક્યેઽપિ રામસ્યોક્તાઽન્તરાત્મતા ॥ ૫૫૧॥

ઈશ્વરઃ સર્વભૂતાનાં હૃદ્દેશેઽર્જુન તિષ્ઠતિ ।
ભ્રામયન સર્વભૂતાનિ યન્ત્રારૂઢાનિ માયયા ॥ ૫૫૨॥

ઉત્તમઃ પુરુષસ્ત્વન્યઃ પરમાત્મેત્યુદાહૃતઃ ।
યો લોકત્રયમાવિશ્ય વિભર્ત્ત્યવ્યય ઈશ્વરઃ ॥ ૫૫૩॥

શ્રીરામશ્ચેતિ ગીતાયાં લોકાન્તઃસ્થો નિયામકઃ ।
સર્વં સૃષ્ટ્વા પ્રવિષ્ટોઽન્તર્જીવેન ચાત્મના સ્વયમ્ ॥ ૫૫૪॥

નિર્લિપ્તશ્ચ સ્વતન્ત્રશ્ચ ભોગવર્જ્યશ્ચ ભોગદઃ ।
વિલક્ષણશ્ચ સર્વેભ્યઃ સર્વજગચ્છરીરકઃ ॥ ૫૫૫॥

સર્વશક્તિશ્ચ સર્વેષાં શક્તિદઃ સર્વરક્ષકઃ ।
ભક્તૈશ્ચ યોગિભિર્ધ્યેયઃ પ્રીતઃ સન્ માર્ગદર્શકઃ ॥ ૫૫૬॥

સાક્ષી ચ સમદર્શી ચ શ્રિતદોષાન્ ન પશ્યતિ ।
સકૃદેવ પ્રપન્નનાં સર્વભીતિનિવારકઃ ॥ ૫૫૭॥

સર્વત્ર રમતે રામઃ સર્વે ચ રમયત્યપિ ।
પરમાત્મા તતો રામઃ સર્વાત્મેતિમતં બુધૈઃ ॥ ૫૫૮॥

રામે વિશ્વં ચ વિશ્વસ્મિન્ વ્યાપ્ય રામો હિ સંસ્થિતઃ ।
અન્તર્યામિતયા સર્વઃ સર્વેષાં પ્રેરકસ્તથા ॥ ૫૫૯॥

રામો હિ પુરુષઃ સર્વદેહેષુ નિરુપાધિકઃ ।

ઉત્તમશ્ચ મહાન્ રામઃ સર્વેષુ પુરુષેષુ તત્ ॥ ૫૬૦॥

અન્તર્બહિર્જગત્ સર્વં વ્યાપ્ય રામો હિ સંસ્થિતઃ ।
અનેન સંવૃતં હ્યન્તર્બહિઃ સર્વં તથાऽऽવૃતમ્ ॥ ૫૬૧॥

પ્રત્યેકં હૃદયં રામ એકોऽપિ બહુરૂપતઃ ।
તત્તદ્દેહવિશિષ્ટઃ સન્નાવિર્ભવતિ વૈ વિભુઃ ॥ ૫૬૨॥

સંસ્થિતો હૃદ્ગુહાયાં સ રાઘવો દેહતઃ શ્રુતઃ ।
સૃષ્ટિમનુપ્રવિષ્ટઃ સ હ્યન્તર્યામિતયા તથા ॥ ૫૬૩॥

દૃશ્યસે સર્વભૂતેષુ ગોષુ ચ બ્રાહ્મણેષુ ચ ।
દિક્ષુ સર્વાસુ ગગને પર્વતેષુ નદીષુ ચ ॥ ૫૬૪॥

સહસ્રચરણઃ શ્રીમાઞ્શતશીર્ષઃ સહસ્રદૃક્ ।
ત્વં ધારયસિ ભૂતાનિ પૃથિવીં સર્વપર્વતાન્ ॥ ૫૬૫॥

જગત્ સર્વં શરીરં તે સ્થૈર્યં તે વસુધાતલમ્ ।
ઇતિ રામાયણે પ્રોક્તા રામાન્તર્યામિતા કિલ ॥ ૫૬૬॥

નરાણાં ચ સમૂહસ્તુ વિશ્રુતો નારસંજ્ઞકઃ ।
તન્નારમયનં યસ્ય નારાયણઃ સ રાઘવઃ ॥ ૫૬૭॥

રમન્તેયોગિનોऽનન્તે નિત્યાનન્દે ચિદાત્મનિ ।
ઇતિ રામપદેનાસૌ પરબ્રહ્માભિધીયતે ॥ ૫૬૮॥

રમયતિ જગત્ સર્વં રામશ્ચિદચિદાત્મકમ્ ।
જગત્સૃષ્ટ્યાદિલીલાભી રામો હિ રમતે સદા ॥ ૫૬૯॥

ચિદચિત્પ્રકૃતૌ રામશ્ચાન્તરાત્મતયા સ્થિતઃ ।
હેયયોગોऽથ ચાત્મનિ યૌવનાદિવત્ ॥ ૫૭૦॥

શ્રીરામઃ સર્વભૂતસ્થો દારુસ્થાનલવદ્ધિ યઃ ।
સદોપાસ્યઃ સ સદ્ભિશ્ચ શ્રદ્ધયા મોક્ષમિચ્છુભિઃ ॥ ૫૭૧॥

સ્વાન્તઃસ્થં ચ પરેશં તં સમુપાસ્ય મુમુક્ષવઃ ।
સાયુજ્યં બ્રહ્મણો યાન્તિ દેહં ત્યક્ત્વાऽર્ચિરાદિના ॥ ૫૭૨॥

અર્ચાવતાર ઃ

સ્વીકૃતશ્ચ તનુત્વેન યેન મણ્યાદિવિગ્રહઃ ।
રામસ્યાર્ચાવતારઃ સ રામાશ્રિતજનેપ્સિતઃ ॥ ૫૭૩॥

વિરાજતેઽતિરમ્યોઽસૌ શૈલતીર્થગૃહાદિષુ ।
સર્વથા લોકકલ્યાણં કુર્વાણોઽમોઘપૂજયા ॥ ૫૭૪॥

દિવ્યદેહ વિશિષ્ટઃ શ્રીરામો બિમ્બેઽનુકમ્પયા ।
સર્વાતિશાયિષાડ્ગુણ્યં રામમૂર્તૌ હિ વર્ત્તતે ॥ ૫૭૫॥

સર્વાતિશાયિષાડ્ગુણ્યં સંસ્થિતં મન્ત્રબિમ્બયોઃ ।
મન્ત્રે વાચ્યાત્મના બિમ્બે કૃપયા સમુપસ્થિતમ્ ॥ ૫૭૬॥

તેનાર્ચ્યો ભગવાન્ સાક્ષાન્નોપચારધિયા ક્વચિત્ ।
વિષ્વક્સેનસંહિતાયામિત્યેવં પરિકીર્ત્તિતમ્ ॥ ૫૭૭॥

રામો મૂર્ત્તાવુપાસ્યો હિ સ્થાપિતઃ શ્રુતિભિઃ શ્રિતૈઃ ।
અર્ચિતવ્યઃ પ્રણમ્યશ્ચ દ્રષ્ટવ્યશ્ચ મુમુક્ષુભિઃ ॥ ૫૭૮॥

અમોઘસંસ્તવો રામો હ્યમોઘં રામદર્શનમ્ ।
અમોઘમરણો રામશ્ચામોઘં રામવન્દનમ્ ॥ ૫૭૯॥

સુરૂપાં પ્રતિમાં વિષ્ણોઃ પ્રસન્નવદનેક્ષણામ્ ।
કૃત્વાત્મનઃ પ્રીતિકરીં સુવર્ણરજતાદિભિઃ ॥ ૫૮૦॥

તસ્યાં બ્રહ્મ સમારોપ્ય મનસા તન્મયો ભવેત્ ।
તામર્ચયેત્ તાં પ્રણમેત્ તાં ભજેત્ તાં વિચિન્તયેત્ ॥ ૫૮૧॥

વિશત્યાપાસ્તદોષસ્તુ તામેવ બ્રહ્મરૂપિણીમ્ ।
વિષ્ણુધર્મોત્તરે ચૈવમીશમૂર્ત્તિર્હિ વર્ણિતા ॥ ૫૮૨॥

મૂર્તૌ તત્સ્થસ્ય રામસ્ય દિવ્યદેહોઽસ્તિ મૂર્ત્તિવત્ ।
પ્રતિમાયાં ભજ્યમાનાયાં તદ્દેહો ભજ્યતે ન હિ ॥ ૫૮૩॥

મૂર્તિર્ભવતિ સાકારા સાકારો રાઘવો યતઃ ।
પ્રાકૃતાકારશૂન્યત્વાન્નિરાકારઃ શ્રુતઃ ક્વચિત્ ॥ ૫૮૪॥

તચ્છ્રુયતામનાધારા ધારણા નોપપદ્યતે ।
પ્રસન્નવદનં ચારુપદ્મપત્રોપમેક્ષણમ્ ॥ ૫૮૫॥

સુકપોલં સુવિસ્તીર્ણલલાટફલકોજ્વલમ્ ।
સમકર્ણાન્તવિન્યસ્ત ચારુકુણ્ડલભૂષણમ્ ॥ ૫૮૬॥

કમ્બુગ્રીવં સુવિસ્તીર્ણ શ્રીવત્સાઙ્કિતવક્ષસમ્ ।

બાલત્રિભઙ્ગિનામગ્નનાભિના હ્યુદરેણ ચ ॥ ૫૮૭॥

પ્રલમ્બાષ્ટભુજં વિષ્ણુમથવાપિ ચતુર્ભુજમ્ ।
સમસ્થિતોરુજઙ્ઘં ચ સુસ્થિતાન્ઘ્રિવરામ્બુજમ્ ॥ ૫૮૮॥

ચિન્તયેદ્ બ્રહ્મભૂતં તં પીતનિર્મલવાસસમ્ ।
કિરીટહારકેયૂરકણ્ટકાદિ વિભૂષિતમ્ ॥ ૫૮૯॥

શાર્ઙ્ગશઙ્ખગદાખડ્ગચક્રાક્ષવલયાન્વિતમ્ ।
વરદાભયહસ્તં ચ મુદ્રિકારત્નભૂષિતમ્ ॥ ૫૯૦॥

ચિન્તયેત્ તન્મયો યોગી સમાધાયાત્મમાનસમ્ ।
ઇતિ વિષ્ણુપુરાણે હિ પ્રોક્તા સાકારતા હરેઃ ॥ ૫૯૧॥

રામસ્યાર્ચાવતારે ન નિયમો દેશકાલયોઃ ।
સુલભો મૂર્ત્તિવન્નેશઃ સ્વરૂપેષુ પરાદિષુ ॥ ૫૯૨॥

તદ્યુગસ્થાવતારૈશ્ચ તત્સ્થા ભક્તા હિ રક્ષિતાઃ ।
અન્યયુગાવતારૈશ્ચેતરસ્થા રક્ષિતા ન તુ ॥ ૫૯૩॥

રક્ષિતાઃ સર્વકાલસ્થા ભક્તા રામસ્ય મૂર્ત્તિભિઃ ।
સ્થાપિતઃ સુલભો રામો મૂર્ત્તૌ મન્ત્રૈશ્ચ વૈદિકૈઃ ॥ ૫૯૪॥

મૂર્ત્તયો વિમુખાનાં ચ સ્વરૂપોદારતાદિભિઃ ।
જનયન્તિ રુચિં રામે વૈમુખ્યમપસાર્ય હિ ॥ ૫૯૫॥

ગુણાઃ પૂર્ણાશ્ચ મૂર્ત્તૌ હિ રામાનુભાવ્યતાદયઃ ।
તતોઽતિસુલભો રામો સ્વમૂર્ત્તાવુચ્યતે બુધૈઃ ॥ ૫૯૬॥

સ્વસ્વામિભાવવ્યત્યાસં કુર્વન્નજ્ઞ ઇવ સ્થિતઃ ।
મૂર્ત્તૌ શક્તોઽપ્યશક્તશ્ચ સ્વતન્ત્રોઽપ્યસ્વતન્ત્રવત્ ॥ ૫૯૭॥

યથાલબ્ધોપચારૈશ્ચ સન્તુષ્ટઃ પૂજયા પરમ્ ।
અપારકરુણાધીનો રામશ્ચેષ્ટં પ્રયચ્છતિ ॥ ૫૯૮॥

સ્નાત્વા સન્ધ્યાદિકં કૃત્વા દેવાભ્યર્ચનકારકઃ ।
શ્રીવશિષ્ઠસંહિતાયામિતિ દેવાર્ચનં મતમ્ ॥ ૫૯૯॥

અર્ચાવતારઃ સર્વેષાં બાન્ધવો ભક્તવત્સલઃ ।
સ્વતન્ત્રઃ સ જગન્નાથોઽપ્યસ્વતન્ત્રો યથા તથા ॥ ૬૦૦॥

સર્વશક્તિર્જગદ્ધાતાઽપ્યશક્ત ઇવ ચેષ્ટતે ।
સર્વાન્ કામાન્ દધત્ સ્વામ્યપ્યશક્ત ઇવ લક્ષ્યતે ॥ ૬૦૧॥

અપરાધાનમિજ્ઞઃ સન્ સદૈવ કુરુતે દયામ્ ।
વિષ્વક્સેનસંહિતાયામિત્યુક્તા પ્રતિમાગુણાઃ ॥ ૬૦૨॥

અતઃ શ્રદ્ધાન્વિતો ભૂત્વા કુર્યાચ્છ્રીરાઘવાર્ચનમ્ ।
ઇતિશિવસંહિતાયાં શ્રીરાઘવાર્ચનં મતમ્ ॥ ૬૦૩॥

ન તસ્ય પ્રતિમેત્યેવમીશોપમૈવ બાધિતા ।
રામસ્ય પ્રતિમાવત્વે શ્રુતિસ્મૃતિપ્રમાણતઃ ॥ ૬૦૪॥

એહ્યશ્માનમાતિષ્ઠાશ્મા ભવતુ તે તનુઃ ।
કૃણ્વન્તુ વિશ્વેદેવા આયુષ્ટે શરદઃ શતમ્ ॥ ૬૦૫॥

અથર્વવેદવાક્યેઽત્ર સર્વેશપ્રતિમા મતા।
સહસ્રસ્ય પ્રતિમાઽસિ યજુર્વેદે મતેતિ ચ ॥ ૬૦૬॥

કાઽઽસીત્ પ્રમા પ્રતિમા ઋગ્વેદેઽપિ તથૈવ ચ ।
અહં સન્નિહિતસ્તત્ર પાષાણપ્રતિમાદિષુ ॥ ૬૦૭॥

શ્રીરામોત્તરતાપિન્યાં પાષાણપ્રતિમા ઇતિ ।
ભગવદ્વિગ્રહાર્ચેતિ સીતોપનિષદિ તથા ॥ ૬૦૮॥

લબ્ધાનુગ્રહ આચાર્યાત્ તેન સન્દર્શિતાગમઃ ।
મહાપુરુષમભ્યર્ચેન્ મૂર્ત્યાભિમતયાઽઽત્મનઃ" ॥ ૬૦૯॥

અર્ચાયામેવ હરયે પૂજાં યઃ શ્રદ્ધયેહતે ।
વ્યરુદન્ દેવલિઙ્ગાનિ શ્રીમદ્ભાગવતેઽપિ ચ ॥ ૬૧૦॥

મઙ્ગલાલપનૈર્હોમૈઃ શોભિતાઃ ક્ષૌમવાસસઃ ।
દેવતાયતાયતનાન્યાશુ સર્વાઃ તાઃ પ્રત્યપૂજયન્ ॥ ૬૧૧॥

ક્વચિચ્ચૈત્યશતૈર્જુષ્ટઃ સુનિવિષ્ટજનાકુલઃ ।
દેવસ્થાનૈઃ પ્રપાભિશ્ચ તટાકૈશ્ચોપશોભિતઃ ॥ ૬૧૨॥

કચ્ચિદ્ ગુરૂઁશ્ચ વૃદ્ધાઁશ્ચ તાપસાન્ દેવતાતિથીન્ ।
ચૈત્યાઁશ્ચ સર્વાન્ સિદ્ધાર્થાન્ બ્રાહ્મણાઁશ્ચ નમસ્યસિ ॥ ૬૧૩॥

ધ્યાયન્નારાયણં દેવં સ્વાસ્તીર્ણે કુશસંસ્તરે ।
વાગ્યતઃ સહ વૈદેહ્યા ભૂત્વા નિયતમાનસઃ ॥ ૬૧૪॥

શ્રીમત્યાયતને વિષ્ણોઃ શિશ્યે નરવવરાત્મજઃ ।
ઇતિ રામાયણે ચાપિ પ્રતિમાપૂજનં મતમ્ ॥ ૬૧૫॥

અનન્યશરણાઃ સર્વે કલૌ સમ્પૂજ્ય કેશવમ્ ।
પરાશરધર્મશાસ્ત્રે ચૈવં કેશવપૂજનમ્ ॥ ૬૧૬॥

અર્ચાવતારા દેવસ્ય વૈભવાઃ પરમાત્મનઃ ।
ઇતિ પદ્મપુરાણેઽપિ દેવસ્યાર્ચાવતારતા ॥ ૬૧૭॥

શાલગ્રામશિલાયાં ચ તુલસીદલકલ્પિતા ।
પૂજા શ્રીરામચન્દ્રસ્ય કોટિકોટિગુણાધિકા ॥ ૬૧૮॥

તુલસીપત્રમાત્રેણ યોઽર્ચયેદ્ રામમન્વહમ્ ।
સ યાતિ શાશ્વતં બ્રહ્મ પુનરાવૃત્તિવર્જિતમ્ ॥ ૬૧૯॥

ઇત્યગસ્યસંહિતાયાં રામમૂર્ત્તિર્હિ સમ્મતા ।
અહોરાત્રં હરેર્નામ કીર્ત્તયન્તિ ચ યે નરાઃ ॥ ૬૨૦॥

કુર્વન્તિ હરિપૂજાં વા ન કલિર્બાધતે ચ તાન્ ।
નારદીયપુરાણે ચ ભગવત્પૂજનં ત્વિતિ ॥ ૬૨૧॥

પ્રતિમાભઙ્ગકારી ચ હ્યપ્રતિષ્ઠઃ પ્રાજાયતે ।
પ્રતિમા સમ્મતા ચૈવં શાતાતપસ્મૃતાવપિ ॥ ૬૨૨॥

સઙ્ક્રમધ્વજયષ્ટીનાં પ્રતિમાનાં ચ ભેદકઃ ।
ઇતિ મનુસ્મૃતૌ ચાપિ પ્રતિમા સમ્મતા ખલુ ॥ ૬૨૩॥

પરિત્રાણાય ભક્તાનાં પ્રાદુર્ભાવઃ કૃતો મયા ।
પ્રાદુર્ભાવાકૃતિઃ કાચિદર્ચયેત્ તાં યુધિષ્ઠિર ॥ ૬૨૪॥

તેનૈવ પરિતુષ્ટોઽહં ભવિષ્યામિ ન સંશયઃ ।
વૈષ્ણવધર્મશાસ્ત્રે ચ ગૌતમીયેઽર્ચનં ત્વિતિ ॥ ૬૨૫॥

તસ્મિન્ શુભ્રાશ્રયે દેવમર્ચયેદ રમયા સહ ।
શ્રીવશિષ્ઠસ્મૃતૌ ચૈવં દેવાર્ચનં પ્રકીર્ત્તિતમ્ ॥ ૬૨૬॥

ષટ્સ્વેતેષુ હરેઃ સમ્યગર્ચનં મુનિભિઃ સ્મૃતમ્ ।
અપ્સ્વગ્નૌ હૃદયે સૂર્યે સ્થણ્ડિલે પ્રતિમાસુ ચ ॥ ૬૨૭॥

વિષ્ણોરભ્યર્ચનં યત્તુ નિત્યં નૈમિત્તિકં નૃપ ।

સ્વસ્મૃતાવિતિ સમ્પ્રોક્તં હારીતેનાર્ચનં હરેઃ ॥ ૬૨૮॥

યથાલાભમર્ચયેચ્ચ કૃત્વા પ્રતિકૃતિં તથા ।
શ્રીબોધાયનકલ્પે ચ પ્રોક્તઃ પૂજાવિધિર્હરેઃ ॥ ૬૨૯॥

સીતાપતેશ્ચ રામસ્ય સમ્પ્રોક્તં વિગ્રહાર્ચનમ્ ।
શ્રીમદ્ગઙ્ગાધરોક્તે ચાનન્યતાઽઽવેદને તથા ॥ ૬૩૦॥

સમસ્તૈરુપચારૈશ્ચ યા પૂજા તુ મયા કૃતા ।
સા સર્વા પૂર્ણતાં યાતુ હ્યપરાધં ક્ષમસ્વ મે ॥ ૬૩૧॥

સદાનન્દેન ચેત્યેવં શ્રીરામયજ્ઞપદ્ધતૌ ।
સ્વીકૃતં શ્રદ્ધયા શ્રીમદ્રામાખ્યબ્રહ્મપૂજનમ્ ॥ ૬૩૨॥

શ્રીરામસ્યાર્ચયા ભક્ત્યા નમસ્કૃત્યા તથૈવ ચ ।
રામે ચેતો નિવેશેન રામપ્રાપ્તિર્ભવેદ ધ્રુવમ્ ॥ ૬૩૩॥

રામેશ્વરાર્યસમ્પ્રોક્તે સત્પ્રબોધામૃતે તથા ।
એવમુક્તા હિ રામસ્ય વિગ્રહસ્ય શુભાર્ચનમ્ ॥ ૬૩૪॥

અર્ચનીયૌ જનૈઃ કૌ ચ સીતારામૌ પરાત્પરૌ ।
સીતારામાર્ચનં ચૈવં દ્વારાનન્દાર્યસમ્મતમ્ ॥ ૬૩૫॥

ષોડશવિધિના યત્ર રામમૂર્ત્તિર્હિ પૂજ્યતે ।
ઇત્થં હિ પૂજનં મૂર્ત્તેર્દેવાનન્દાર્યસમ્મતમ્ ॥ ૬૩૬॥

અથાતઃ સમ્પ્રક્ષ્યામિ પ્રતિમા વિધિમુત્તમમ્ ।
શિલામયી લોહમયી તથા રત્નમયીતિ ચ ॥ ૬૩૭॥

તથા કાષ્ઠમયી ચેતિ મૃન્મયી ચેતિ પઞ્ચધા ।
સનત્કુમારસમ્પ્રોક્તમેવં હિ મૂર્ત્તિપઞ્ચકમ્ ॥ ૬૩૮॥

શૈલી દારુમયી લૌહી લેપ્યા લેખ્યા ચ સૈકતી ।
મણિમયી મનોમયી પ્રતિમાષ્ટવિધા સ્મૃતા ॥ ૬૩૯॥

ચલાચલેતિ દ્વિવિધા પ્રતિષ્ઠા જીવમન્દિરમ્ ।
શ્રીમદ્ભાગવતે ચેત્થં પ્રતિમા ચાષ્ટવિધા મતા ॥ ૬૪૦॥

સ્વયંવ્યક્તશ્ચ દેવશ્ચ સૈદ્ધશ્ચ માનુષઃ ખલુ ।
મૂર્ત્તિભેદાશ્ચતુર્ધૈવં પ્રમેયોદ્દેશભાસ્કરે ॥ ૬૪૧॥

ગુણલીલાસ્વરૂપૈશ્ચમિતિર્યસ્ય ન વિદ્યતે ।
અતો વાઙ્મનસાવેદ્યઃ શ્રીરામઃ શરણં મમ ॥ ૬૪૨॥

કર્તા સર્વસ્ય જગતો ભર્તા સર્વસ્ય સર્વગઃ ।
આહર્ત્તા કાર્યજાતસ્ય શ્રીરામઃ શરણં મમ ॥ ૬૪૩॥

વાસુદેવાદિમૂર્ત્તનાં ચતુર્ણાં કારણં પરમ્ ।
ચતુર્વિંશતિમૂર્ત્તીનામાશ્રયઃ શરણં મમ ॥ ૬૪૪॥

નિત્યમુક્તજનૈર્જુષ્ટો નિવિષ્ટઃ પરમે પદે ।
પરં પરમભક્તાનાં શ્રીરામઃ શરણં મમ ॥ ૬૪૫॥

મહદાદિસ્વરૂપેણ સંસ્થિતઃ પ્રાકૃતે પદે ।
બ્રહ્માદિદેવરૂપૈશ્ચ શ્રીરામઃ શરણં મમ ॥ ૬૪૬॥

મન્વાદિનૃપરૂપેણ શ્રુતિમાર્ગં વિભર્ત્તિ ચ ।
પ્રજાપતિસ્વરૂપેણ શ્રીરામઃ શરણં મમ ॥ ૬૪૭॥

ઋષિરૂપેણ યો દેવો વન્યવૃત્તિમપાલયત્ ।
યોઽન્તરાત્મા હિ સર્વેષાં શ્રીરામઃ શરણં મમ ॥ ૬૪૮॥

યોઽસૌ સર્વતનુઃ સર્વઃ સર્વનામા સનાતનઃ ।
અલિપ્તઃ સર્વભાવેષુ શ્રીરામઃ શરણં મમ ॥ ૬૪૯॥

બહિર્મર્ત્ત્યાદિરૂપેણ સદ્ધર્મમનુપાલયન્ ।
પરિપાતિ જનાન્ દીનાન્ શ્રીરામઃ શરણં મમ ॥ ૬૫૦॥

યશ્ચાત્માનં પૃથક્ કૃત્ય ભક્તપ્રેમવશં ગતઃ ।
અર્ચાયામાસ્થિતો દેવઃ શ્રીરામઃ શરણં મમ ॥ ૬૫૧॥

અર્ચાવતારરૂપેણ દર્શનસ્પર્શનાદિભિઃ ।
દીનાનુદ્ધરતે યોઽસૌ શ્રીરામઃ શરણં મમ ॥ ૬૫૨॥

ઇતિ બ્રહ્મસંહિતાયાં નારાયણાભિભાષિતઃ ।
પરિપૂર્ણતમં બ્રહ્મ શ્રીરામઃ પઞ્ચધા સ્થિતઃ ॥ ૬૫૩॥

પઞ્ચધાઽવસ્થિતો રામઃ પરવ્યૂહાદિભેદતઃ ।
તસ્મૈ પરસ્વરૂપાય શ્રીરામાય નમો નમઃ ॥ ૬૫૪॥

સ પરઃ પરધામસ્થઃ સર્વાવતારકારણમ્ ।
તસ્મૈ પરસ્વરૂપાય શ્રીરામાય નમો નમઃ ॥ ૬૫૫॥

દિવ્યપરિકરાયાથ દિવ્યભૂષણહેતયે ।
દિવ્યદેહગુણાયાથ શ્રીરામાય નમો નમઃ ॥ ૬૫૬॥

શ્રોસીતયા હિ યુક્તાય નિત્યમુક્તસ્તુતાય ચ ।
નિત્યમુક્તૈકભોગ્યાય શ્રીરામાય નમો નમઃ ॥ ૬૫૭॥

વેદવેદ્યઃ પરબ્રહ્મ નિત્યધામાધિનાયકઃ ।
મુક્તપ્રાપ્યશ્ચ યસ્તસ્મૈ શ્રીરામાય નમો નમઃ ॥ ૬૫૮॥

સૃષ્ટ્યાદ્યર્થં હિ લોકાનાં સ્વભક્તાનુગ્રહાય ચ ।
ચતુર્વ્યૂહસ્વરૂપાય શ્રીરામાય નમો નમઃ ॥ ૬૫૯॥

ઉદ્ભૂતષડ્ગુણઃ પૂર્ણો વ્યૂહઃ શાન્તાબ્ધિવદ્ધિ યઃ ।
વાસુદેવાત્મને તસ્મૈ શ્રીરામાય નમો નમઃ ॥ ૬૬૦॥

વ્યૂહો યઃ કુરુતે શાસ્ત્રં જ્ઞાનાદ્ બલાચ્ચ સંહતિમ્ ।
સઙ્કર્ષણાત્મને તસ્મૈ શ્રીરામાય નમો નમઃ ॥ ૬૬૧॥

સૃષ્ટિમૈશ્વર્યતો વ્યૂહો યો વીર્યાદ્ ધર્મમાતનોત્ ।
તસ્મૈ પ્રદ્યુમ્નરૂપાય શ્રીરામાય નમો નમઃ ॥ ૬૬૨॥

શક્ત્યા રક્ષતિ યો વ્યૂહો જ્ઞાનં દદાતિ તેજસા ।
અનિરુદ્ધાત્મને તસ્મૈ શ્રીરામાય નમો નમઃ ॥ ૬૬૩॥

એભ્યો દ્વાદશસઙ્ખ્યાકા વ્યૂહાશ્ચ સમ્ભવન્તિ હિ ।
તત્તદ્વ્યૂહસ્વરૂપાય શ્રીરામાય નમો નમઃ ॥ ૬૬૪॥

ચતુશ્ચક્રધરસ્તત્ર સ્વર્ણકાન્તિર્હિ કેશવઃ ।
કેશવવ્યૂહરૂપાય શ્રીરામાય નમો નમઃ ॥ ૬૬૫॥

ચતુઃશઙ્ખધરઃ શ્યામો વ્યૂહો નારાયણઃ સ્મૃતઃ ।
નારાયણસ્વરૂપાય શ્રીરામાય નમો નમઃ ॥ ૬૬૬॥

ચતુર્ગદાધરો વ્યૂહો મણિકાન્તશ્ચ માધવઃ ।
માધવવ્યૂહરૂપાય શ્રીરામાય નમો નમઃ ॥ ૬૬૭॥

ચતુઃશાર્ઙ્ગધરો વ્યૂહો ગોવિન્દશ્ચ શશાઙ્કવત્ ।
ગોવિન્દવ્યૂહરૂપાય શ્રીરામાય નમો નમઃ ॥ ૬૬૮॥

પદ્મકેસરવદ્ વિષ્ણુશ્ચતુર્લાઙ્ગલધારકઃ ।

વિષ્ણુવ્યૂહસ્વરૂપાય શ્રીરામાય નમો નમઃ ॥ ૬૬૯ ॥

ચતુર્મુશલધર્ત્તા હિ પદ્મવન્મધુસૂદનઃ ।
મધુસૂદનરૂપાય શ્રીરામાય નમો નમઃ ॥ ૬૭૦ ॥

ચતુઃખડ્ગધરો વ્યૂહો વહ્નિવદ્ધિ ત્રિવિક્રમઃ ।
ત્રિવિક્રમસ્વરૂપાય શ્રીરામાય નમો નમઃ ॥ ૬૭૧ ॥

ચતુર્વજ્રધરો વ્યૂહ વામનો બાલસૂર્યવત્ ।
વામનવ્યૂહરૂપાય શ્રીરામાય નમો નમઃ ॥ ૬૭૨ ॥

ચતુઃપટ્ટિશધર્ત્તા હિ શ્રીધરઃ પુણ્ડરીકવત્ ।
શ્રીધરવ્યૂહરૂપાય શ્રીરામાય નમો નમઃ ॥ ૬૭૩ ॥

હૃષીકેશસ્વરૂપાય શ્રી રામાય નમો નમઃ ॥ ૬૭૪ ॥

વિદ્યુત્ કાન્તિહૃષીકેશશ્ચતુર્મુદ્ગરધારકઃ ।
પઞ્ચાયુધધરો વ્યૂહો પદ્મનાભશ્ચ સૂર્યવત્ ।
પદ્મનાભસ્વરૂપાય શ્રીરામાય નમો નમઃ ॥ ૬૭૫ ॥

ચતુઃપાશધરો દામોદરશ્ચાથેન્દ્રગોપવત્ ।
દામોદરસ્વરૂપાય શ્રીરામાય નમો નમઃ ॥ ૬૭૬ ॥

દ્વાદશાદિત્યદેવા હિ ચૈતે ભાલાદિવૃત્તયઃ ।
એતદ્વાદશરૂપાય શ્રીરામાય નમો નમઃ ॥ ૬૭૭ ॥

તત્તદ્દેવાદિરૂપેણ પ્રાદુર્ભવતિ રાઘવઃ ।
તસ્મૈ હિ વિભવાખ્યાય શ્રીરામાય નમો નમઃ ॥ ૬૭૮ ॥

શઙ્ખાસુરમહન્ રામો મત્સ્યરૂપં વિધાય હિ ।
તસ્મૈ મત્સ્યાવતારાય શ્રીરામાય નમો નમઃ ॥ ૬૭૯ ॥

મન્દરં ધૃતવાન્ રામો કૂર્મરૂપં વિધાય હિ ।
તસ્મૈ કૂર્માવતારાય શ્રીરામાય નમો નમઃ ॥ ૬૮૦ ॥

હતો વારાહરૂપેણ હિરણ્યાક્ષશ્ચ શાર્ઙ્ગિણા ।
તસ્મૈ વરાહરૂપાય શ્રીરામાય નમો નમઃ ॥ ૬૮૧ ॥

હિરણ્યકશિપું ચાહન્ રામો નૃસિંહરૂપધૃત્ ।
તસ્મૈ નૃસિંહરૂપાય શ્રીરામાય નમો નમઃ ॥ ૬૮૨ ॥

વામનરૂપરામેણ પાતાલં પ્રાપિતો બલિઃ ।
તસ્મૈ વામનરૂપાય શ્રીરામાય નમો નમઃ ॥ ૬૮૩॥

અજયત્ ક્ષત્રિયાન્ રામઃ પરશુરામરૂપધૃત્ ।
તસ્મૈ પરશુરામાય શ્રીરામાય નમો નમઃ ॥ ૬૮૪॥

દાશરથિતયા રામો રાવણં હતવાનિહ ।
તસ્મૈ શ્રીરામરૂપાય શ્રીરામાય નમો નમઃ ॥ ૬૮૫॥

વાસુદેવતયા રામો કંસાદીનવધીત્ ખલુ ।
તસ્મૈ શ્રીકૃષ્ણરૂપાય શ્રીરામાય નમો નમઃ ॥ ૬૮૬॥

રામેણ બુદ્ધરૂપેણ વઞ્ચિતાસ્તામસા જનાઃ ।
તસ્મૈ બુદ્ધસ્વરૂપાય શ્રીરામાય નમો નમઃ ॥ ૬૮૭॥

રામેણ કલ્કિરૂપેણ શાસિતાઃ કલિશાસકાઃ ।
તસ્મૈ કલ્કિસ્વરૂપાય શ્રીરામાય નમો નમઃ ॥ ૬૮૮॥

રામો વિભવરૂપાણિ બહૂનિ ધૃતવાનિહ ।
સર્વવિભવરૂપાય શ્રીરામાય નમો નમઃ ॥ ૬૮૯॥

હેતુરિચ્છાવતારે સાધુત્રાણાદિત્રયં ફલમ્ ।
સર્વાવતારિરૂપાય શ્રીરામાય નમો નમઃ ॥ ૬૯૦॥

પ્રવિશ્યાન્તર્નિયન્તૃત્વં રામાન્તર્યામિતા મતા ।
અન્તર્યામિસ્વરૂપાય શ્રીરામાય નમો નમઃ ॥ ૬૯૧॥

અઙ્ગીકૃત્યતનુત્વેન હેમાદિકં હિ રાઘવઃ ।
ભવત્યર્ચાતનુસ્તસ્મૈ શ્રીરામાય નમો નમઃ ॥ ૬૯૨॥

અમોઘદર્શનો યશ્ચ હ્યમોઘસ્તવનોઽપિ યઃ ।
યશ્ચામોઘાર્ચનસ્તસ્મૈ શ્રીરામાય નમો નમઃ ॥ ૬૯૩॥

સુલભો રાઘવો મૂર્ત્તૌ સન્નિધાનાદિહેતુતઃ ।
તસ્મૈ ચાર્ચાવતારાય શ્રીરામાય નમો નમઃ ॥ ૬૯૪॥

તુષ્યતિ મેધયા યો ન તપસા નો ન કર્મણા ।
ભક્ત્યૈવ તુષ્યતે તસ્મૈ શ્રીરામાય નમો નમઃ ॥ ૬૯૫॥

ભક્ત્યા યોઽથ પ્રપત્ત્યા ચ સન્તોષિતો મુમુક્ષુભિઃ ।
મોક્ષપ્રદાયકસ્તસ્મૈ શ્રીરામાય નમો નમઃ ॥ ૬૯૬॥

યશ્ચ સકૃત્પ્રપત્ત્યૈવ સર્વેભ્યશ્ચાભયપ્રદઃ ।
તસ્મૈ શ્રેષ્ઠશરણ્યાય શ્રીરામાય નમો નમઃ ॥ ૬૯૭॥

સમ્પ્રાપ્ય રાઘવં મુક્તો જીવનાવર્ત્તતે તતઃ ।
હારિણે સર્વભીતીનાં શ્રીરામાય નમો નમઃ ॥ ૬૯૮॥

સ્તવે વેદાન્તસારાખ્યે શ્રી સદાનન્દનિર્મિતે ।
એવં નિરૂપિતા ચાસ્તિ પઞ્ચધા રામસંસ્થિતિઃ ॥ ૬૯૯॥

શ્રીરામોપાસને પઞ્ચાધિકારાઃ શાસ્ત્રસમ્મતાઃ ।
ઉપાસિતુશ્ચ તત્રાર્ચોપાસને ચાદિમો મતઃ ॥ ૭૦૦॥

વિભવોપાસને તસ્ય દ્વિતીયાધિકૃતિઃ ખલુ ।
તૃતીયશ્ચાધિકારો હિ વ્યૂહસ્યોપાસને મતઃ ॥ ૭૦૧॥

ઉપાસને તુરીયસ્તુ પરસ્ય રાઘવસ્ય હિ ।
અન્તઃસ્થસ્ય ચ રામસ્યોપાસને પઞ્ચમો મતઃ ॥ ૭૦૨॥

પ્રકૃતિ ઃ
પ્રમાયા વિષયો યત્ તત્ પ્રમેયં સમ્મતં બુધૈઃ ।
દ્રવ્યાદ્રવ્યત્વભેદેન પ્રમેયં દ્વિવિધં મતમ્ ॥ ૭૦૩॥

દ્રવ્યત્વેન મતં પ્રાજ્ઞૈઃ પ્રમેયં હિ ગુણાશ્રયઃ ।
રૂપીઘટઃ પ્રતીતેશ્ચ દ્રવ્યં નિર્ધર્મકં ન હિ ॥ ૭૦૪॥

આગન્તુકાપૃથક્સિદ્ધધર્માશ્રયસ્ય દ્રવ્યતા ।
જીવબ્રહ્મપ્રધાનાદિભેદાદ દ્રવ્યં ચ ષડ્વિધમ્ ॥ ૭૦૫॥

જડાજડત્વભેદેન દ્વિધા તચ્ચ પ્રકીર્ત્તિતમ્ ।
શૂન્યં રજસ્તમોભ્યાં યત્ સત્વં તદ્રહિતં જડમ્ ॥ ૭૦૬॥

પ્રકૃતિકાલભેદેન જડં દ્વિધા સમીરિતમ્ ।
ચૈતન્યરહિતં દ્રવ્યં પ્રકૃતિઃ સા ગુણત્રયા ॥ ૭૦૭॥

સત્વં રજસ્તમ ઇતિ ગુણાઃ પ્રકૃતિસમ્ભવાઃ ।
નિબન્ધાતિ મહાબાહો ! દેહે દેહિનમવ્યયમ્ ॥ ૭૦૮॥

તત્ર સત્વં નિર્મલત્વાત્ પ્રકાશકમનામયમ્ ।
સુખસઙ્ગેન તન્નિબધ્નાતિ બન્ધાતિ જ્ઞાનસઙ્ગેન ચાનઘ ॥ ૭૦૯॥

રજો રાગાત્મકં વિદ્ધિ તૃષ્ણાસઙ્ગસમુદ્ભવમ્ ।
તન્નિબધ્નાતિ કૌન્તેય કર્મસઙ્ગેન દેહિનમ્ ॥ ૭૧૦॥

તમસ્ત્વજ્ઞાનજં વિદ્ધિ મોહનં સર્વદેહિનામ્ ।
પ્રમાદાલસ્યનિદ્રાભિસ્તન્નિબધ્નાતિ ભારત ॥ ૭૧૧॥

સત્વં સુખે સઞ્જયતિ રજઃ કર્મણિ ભારત ।
જ્ઞાનમાવૃત્ય તુ તમઃ પ્રમાદે સઞ્જયત્યુત ॥ ૭૧૨॥

સર્વદ્વારેષુ દેહેઽસ્મિન્ પ્રકાશ ઉપજાયતે ।
જ્ઞાનં યદા તદા વિદ્યાદ્ વિવૃદ્ધં સત્વમિત્યુત ॥ ૭૧૩॥

લોભઃ પ્રવૃત્તિરારમ્ભઃ કર્મણામશમઃ સ્પૃહા ।
રજસ્યેતાનિ જાયન્તે વિવૃદ્ધે ભારતર્ષભ ॥ ૭૧૪॥

અપ્રકાશોઽપ્રવૃત્તિશ્ચ પ્રમાદો મોહ એવ ચ ।
તમસ્યેતાનિ જાયન્તે વિવૃદ્ધે કુરુનન્દન ॥ ૭૧૫॥

ત્રયઃ સત્વાદયશ્ચૈવં ગીતાયાં પ્રકૃતેર્ગુણાઃ ।
એતેષાં ચ ગુણાનાં હિ સામ્યં પ્રકૃતિલક્ષણમ્ ॥ ૭૧૬॥

અવૈષમ્યં મતં સામ્યં વૈષમ્યં વિકૃતૌ મતમ્ ।
વિકારાઁશ્ચ કરીત્યસ્યા ઈશસ્તત્ પ્રકૃતિર્હિ સા ॥ ૭૧૭॥

વિકૃતિત્વં વિના તત્ર પ્રકૃતિત્વં હિ વર્ત્તતે ।
ક્ષરં પ્રધાનમિત્યુક્તયા ક્ષરં સા ક્ષરણાન્મતા ॥ ૭૧૮॥

વિચિત્રસૃષ્ટિહેતુત્વાદિયં માયેતિ કથ્યતે ।
અવિદ્યાપદવાચ્યેયં વિદ્યાવિરોધિતાઽત્ર યત્ ॥ ૭૧૯॥

મહદાદિતયાઽવ્યક્તા તતોઽવ્યક્તતયા મતા ।
પ્રથમશ્ચ વિકારોઽસ્યા મહત્તત્ત્વતયા મતઃ ॥ ૭૨૦॥

અવ્યક્તદેહિરામસ્ય ચાવસ્થા સ પ્રકીર્તિતઃ ।
સત્વાદિગુણભેદાત્ સ ત્રિવિધઃ સમુદીરિતઃ ॥ ૭૨૧॥

બુદ્ધાવધ્યવસાયેઽસ્ય સાઙ્ખ્યૈઃ પર્યાયતા મતા ।
આત્મધર્મૌ ચ તૌ તસ્માદુપપન્ના ન સા ખલુ ॥ ૭૨૨॥

પ્રથમશ્ચ વિકારોઽસ્યાહઙ્કારસ્ત્રિવિધસ્તથા ।
મહચ્છરીરિરામસ્યાવસ્થા સઙ્કલ્પતો હિ સા ॥ ૭૨૩॥

તસ્યાભિમાનતા નો યજ્ જ્ઞાનત્વં નાસ્તિ તત્ર હિ ।
દેહાહમ્ભાવહેતુત્વાદસ્યાહઙ્કારવાચ્યતા ॥ ૭૨૪॥

શાસ્ત્રે ચૈતે પ્રસિદ્ધાશ્ચાહઙ્કારાઃ સાત્ત્વિકાદયઃ ।
વૈકારિકસ્તૈજસશ્ચ ભૂતાદિરિતિસંજ્ઞા ॥ ૭૨૫॥

તૈજસસહકારાચ્ચ ભૂતાદેઃ સમજાયત ।
શબ્દતન્માત્રકં તસ્માદ્ ભૂતમાકાશસંજ્ઞકમ્ ॥ ૭૨૬॥

ભૂતાવ્યવહિતં પૂર્વં દ્રવ્યં તન્માત્રસંજ્ઞકમ્ ।
તન્માત્રાવ્યવધાનેન જાતં દ્રવ્યં યદુત્તરમ્ ॥ ૭૨૭॥

મહાભૂતં હિ તત્પ્રોક્તં પ્રાજ્ઞૈઃ તત્ત્વોપદેશકૈઃ ।
ઉપાદાનં હિ તન્માત્રં ભૂતે તન્માત્ર કાર્યતા ॥ ૭૨૮॥

ત્રિવિધોઽયમહઙ્કારો મહત્તત્ત્વાદજાયત્ ।
ભૂતેન્દ્રિયાણાં હેતુસ્સ ત્રિગુણત્વાન્મહામુને ॥ ૭૨૯॥

યથા પ્રધાનેન મહાન્ મહતા સ તથાવૃતઃ ।
ભૂતાદિસ્તુ વિકુર્વાણઃ શબ્દતન્માત્રકં તતઃ ॥ ૭૩૦॥

સસર્જ શબ્દતન્માત્રાદાકાશં શબ્દલક્ષણમ્ ।
શબ્દમાત્રં તથાકાશં ભૂતાદિઃ સ સમાવૃણોત્ ॥ ૭૩૧॥

આકાશસ્તુ વિકુર્વાણઃ સ્પર્શમાત્રં સસર્જ હ ।
બલવાનભવદ્ વાયુસ્તસ્ય સ્પર્શો ગુણો મતઃ ॥ ૭૩૨॥

આકાશં શબ્દમાત્રં તુ સ્પર્શમાત્રં સમાવૃણોત્ ।
તતો વાયુર્વિકુર્વાણો રૂપમાત્રં સસર્જ હ્ ॥ ૭૩૩॥

જ્યોતિરુત્પદ્યતે વાયોસ્તદ્ રૂપગુણમુચ્યતે ।
સ્પર્શમાત્રં તુ વૈ વાયૂ રૂપમાત્રં સમાવૃણોત્ ॥ ૭૩૪॥

જ્યોતિશ્ચાપિ વિકુર્વાણં રસમાત્રં સસર્જ હ ।
સમ્ભવન્તિ તતોઽમ્ભાંસિ રસાધારાણિ તાનિ ચ ॥ ૭૩૫॥

રસમાત્રાણિ ચામ્ભાંસિ રૂપમાત્ર સમાવૃણોત્ ।
વિકુર્વાણાનિ ચામ્ભાંસિ ગન્ધમાત્રં સસર્જિરે ॥ ૭૩૬॥

સઙ્ઘાતે જાયતે તસ્માત્ તસ્ય ગન્ધો ગુણો મતઃ ।

તસ્મિંસ્તસ્મિંસ્તુ તન્માત્રં તેન તન્માત્રતા સ્મૃતા ॥ ૭૩૭॥

તન્માત્રાણ્યવિશેષાણિ અવિશેષાસ્તતો હિ તે ।
ન શાન્તા નાપિ ઘોરાસ્તે ન મૂઢાશ્ચાવિશેષિણઃ ॥ ૭૩૮॥

ભૂતતન્માત્ર સર્ગોઽયમહઙ્કારાત્તુ તામસાત્ ।
એવં વિષ્ણુપુરાણોક્તં ભૂતતન્માત્રપઞ્ચકમ્ ॥ ૭૩૯॥

શબ્દસ્પર્શાદિભેદૈશ્ચ તન્માત્રં પઞ્ચધા મતમ્ ।
આકાશાદિવિભેદૈશ્ચ મહાભૂતં હિ પઞ્ચધા ॥ ૭૪૦॥

અનુદ્ભૂતાશ્ચ તન્માત્રે શબ્દાદયો ગુણા મતાઃ ।
મહાભૂતેષુ તદ્ભૂતાઃ સન્તિ શબ્દાદિકા ગુણાઃ ॥ ૭૪૧॥

સ્પર્શેન રહિતં દ્રવ્યમુદ્ભૂતશબ્દવન્નભઃ ।
પતગપતનાધારરૂપેણ ખં હિ ચાક્ષુષમ્ ॥ ૭૪૨॥

એતસ્માજ્જાયતે પ્રાણો મનઃ સર્વેન્દ્રિયાણિ ચ ।
ખં વાયુરિતિપ્રામાણ્યાદનિત્યત્વં ચ ખસ્ય હિ ॥ ૭૪૩॥

ખસ્ય સાવયવત્વં હિ પઞ્ચીકરણતો મતમ્ ।
તત એવ તથાઽઽકાશે નીલરૂપં હિ દૃશ્યતે ॥ ૭૪૪॥

ઇન્દ્રિયાણાં ન ભૂતાનિ હેતવઃ પોષકાનિ તુ ।
દિગ્વ્યવહારહેતુશ્ચ શ્રોત્રસ્યાપ્યાયકં હિ ખમ્ ॥ ૭૪૫॥

આકાશાત્ સ્પર્શતન્માત્રં તતોં વાયુરજાયત ।
આકાશવાયુમધ્યસ્થં તન્માત્રં સ્પર્શસંજ્ઞકમ્ ॥ ૭૪૬॥

અનુદ્ભૂતો મતઃ સ્પર્શસ્તન્માત્રે સ્પર્શસંજ્ઞકે ।
ઉદભૂતસ્પર્શવાન્ વાયૂ રૂપેણ રહિતઃ સ ચ ॥ ૭૪૭॥

ત્વઙ્માત્રગ્રાહ્યતા વાયૌ શબ્દસ્પર્શૌ ગુણૌ તથા ।
સ્પર્શો વાયુપૃથિવ્યોશ્ચાનુષ્ણાશીતો હિ વર્ત્તતે ॥ ૭૪૮॥

નીરાદિયોગતો વાયૌ। શીતાદિપ્રત્યયસ્તથા ।
આપ્યાયકસ્ત્વચો વાયુર્વિદ્વદ્ભિઃ સમ્પ્રકીર્ત્તિતઃ ॥ ૭૪૯॥

એતસ્માજ્જાયતે પ્રાણો મનઃ સર્વેન્દ્રિયાણિ ચ ।
ખં વાયુરિતિપ્રામાણ્યાદ્ વાયોરનિત્યતા મતા ॥ ૭૫૦॥

ઉક્તશ્રુતૌ પૃથગ્ વાયોઃ પ્રાણસ્ય ચોપદેશતઃ ।
જીવધારણસામર્થ્યાત્ પ્રાણો વાયુર્વિલક્ષણઃ ॥ ૭૫૧ ॥

જીવોપકરણં પ્રાણઃ સહોક્તેર્મનાદિભિઃ ।
અણુશ્ચોત્ક્રાન્તિતઃ પ્રાણો ન વિભુઃ સૂત્રકૃન્મતે ॥ ૭૫૨ ॥

ઇન્દ્રિયાણાં ચ સત્તાસુ યા પ્રાણાધીનતા તતઃ ।
વિદ્ભિઃ સમ્મતા તેષુ પ્રાણશબ્દાભિધેયતા ॥ ૭૫૩ ॥

ઇન્દ્રિયાપરતન્ત્રત્વાત્ પ્રાણે નેન્દ્રિયવાચ્યતા ।
શરીરમધ્યસઞ્ચારી વાયુઃ પ્રાણતયા મતઃ ॥ ૭૫૪ ॥

હૃદિ પ્રાણો ગુદેઽપાનઃ સમાનો નાભિમણ્ડલે ।
ઉદાનઃ કણ્ઠદેશસ્થો વ્યાનઃ સર્વશરીરગઃ ॥ ૭૫૫ ॥

સ્થાનપઞ્ચકસંસ્થશ્ચ પ્રાણસ્ત્વેવં પ્રકીર્ત્તિતઃ ।
તતશ્ચ પઞ્ચવૃત્ત્યાદિ સૂત્રકારેણ સૂત્રિતમ્ ॥ ૭૫૬ ॥

તન્માત્રં રૂપસંજ્ઞં હિ મધ્યગં વાયુતેજસોઃ ।
તેજો ભૂતં તતો જાતં પોષકં તદ્ધિ ચક્ષુષઃ ॥ ૭૫૭ ॥

ઉષ્ણસ્પર્શવત્તેજઃ પાચકોઽર્કાદિરૂપતઃ ।
આલોકાદિકરૂપેણ ચાક્ષુષે સહકારકમ્ ॥ ૭૫૮ ॥

ચતુર્ધા ભૌમદિવ્યૌદર્યાકરજવિભેદતઃ ।
ભૌમં દીપાદિકં દિવ્યં વારિમાત્રેન્ધનં તથા ॥ ૭૫૯ ॥

આકરજં સુવર્ણાદિ ચૌદર્યં જઠરાનલઃ ।
પ્રભાપ્રભાવિશિષ્ટેતિભેદાત્ તેજો દ્વિધા પુનઃ ॥ ૭૬૦ ॥

દ્રવ્યગુણસ્વરૂપાથ સાવયવા મતા પ્રભા ।
શબ્દઃ સ્પર્શશ્ચ રૂપં ચ તેજોગુણાઃ પ્રકીર્ત્તિતાઃ ॥ ૭૬૧ ॥

તન્માત્રં રસસંજ્ઞં હિ મધ્યગં જલતેજસોઃ ।
શીતસ્પર્ગવિશિષ્ટં ચ તસ્માજ્જલમજાયત ॥ ૭૬૨ ॥

બહુધાઽબ્ધ્યાદિરૂપં ચ પિણ્ડાદિકારકં હિ તત્ ।
શબ્દોઽભાસ્વરશુક્લં ચ રૂપં ચ મધુરો રસઃ ॥ ૭૬૩ ॥

જલાચ્ચ ગન્ધતન્માત્રં તતો જાતા વસુન્ધરા ।
ઉદ્ભૂતગન્ધવત્ત્વં હિ પૃથિવ્યા લક્ષણં મતમ્ ॥ ૭૬૫ ॥

શબ્દઃ સ્પર્શશ્ચ રૂપં ચ રસો ગન્ધો ગુણાઃ ક્ષિતૌ ।
ઘ્રાણસ્ય મનસશ્ચાથ પોષિકા પૃથિવી મતા ॥ ૭૬૬॥

મૃદાદિભેદતોઽનેકપ્રકારશાલિની ક્ષિતિઃ ।
સ્પર્શાદયસ્તુ ચત્વારઃ પૃથિવ્યાં પાકજા ગુણાઃ ॥ ૭૬૭॥

અન્તર્ભાવો પૃથિવ્યાં હિ તમસો મન્યતે બુધૈઃ ।
ક્ષિતે રૂપં તથાઽવસ્થા યતસ્તમસિ દૃશ્યતે ॥ ૭૬૮॥

રામેણ સર્વભૂતાનાં કૃત્વા ભાગદ્વયં સમમ્ ।
અર્ધભાગચતુર્થાંશાઃ સ્વભિન્નાર્ધેષુ યોજિતાઃ ॥ ૭૬૯॥

પઞ્ચીકૃતં હિ રામેણ ભૂતં જગત્સિસૃક્ષુણા ।
સ્વભાગસ્યાધિકત્વાચ્ચ સ્વનામ્ના વ્યપદિશ્યતે ॥ ૭૭૦॥

પઞ્ચીકૃતૈશ્ચ ભૂતૈશ્ચ રામશ્ચાણ્ડં ચકાર હિ ।
તતશ્ચોત્પાદ્ય બ્રહ્માણં તદ્વારા કૃતવાઞ્ જગત્ ॥ ૭૭૧॥

તતો લીલાર્થમાત્માનં બહકલ્પયદીશ્વરઃ ।
અથ પ્રધાનમસૃજત્ પુરુષાધિષ્ઠિતં સ્વતઃ ॥ ૭૭૨॥

તતો મહાન્તમવ્યક્તાજ્જનયામાસ નારદ ।
ગુણત્રયાત્મકં તસ્માદહઙ્કારમતઃ પરમ્ ॥ ૭૭૩॥

ઇન્દ્રિયાણિ દશૈતાનિ જ્ઞાનકર્માત્મકાનિ વૈ ।
મનશ્ચ સાત્વિકાત્ તસ્માદહઙ્કારાદજીજનત્ ॥ ૭૭૪॥

ભૂતાનિ ભૂતસૂક્ષ્માણિ દશૈતાનિ મહામુને ।
અસૃજત્તામસાત્ તસ્માદહઙ્કારરાજ્જનાર્દનઃ ॥ ૭૭૫॥

મહદાદિવિશેષાન્તરેતૈરણ્ડમજીજનત્ ।
દશોત્તરૈરાવરણૈઃ સપ્તભિઃ પરિવેષ્ટિતમ્ ॥ ૭૭૬॥

તસ્મિન્નણ્ડે સ્વયં વિષ્ણુઃ પ્રજાપતિમથાકરોત્ ।
ઉચ્ચાવચાનાં ભૂતાનાં કર્ત્તારં નિજશક્તિભિઃ ॥ ૭૭૭॥

હરિઃ સ્વશક્તિરૂપેણ કાલેન ચ સમન્વિતઃ ।
મહદાદિષુ સૃજ્યેષુ સૃષ્ટિ ચક્રે જગન્મયઃ ॥ ૭૭૮॥

વિષ્ણુર્બ્રહ્માપદેશેન ચિદચિન્મિશ્રિતં જગત્ ।

વિચિત્રં જનયામાસ તત્તચ્છક્તિસમન્વિતઃ ॥ ૭૭૯॥

વેદાનાલોચ્ય ભૂતાનાં દેવાદીનાં યમઃ પ્રભુઃ ।
નામરૂપે ચ વિવિધે યથાપૂર્વમકલ્પયત્ ॥ ૭૮૦॥

સર્વેદાવપ્તસકલકામોઽપિ પરમેશ્વરઃ ।
જન્તુભિર્નિજસૃષ્ટૈશ્ચ લીલારસમથાન્વભૂત્ ॥ ૭૮૧॥

અનાલોચ્યૈવ જગતાં ત્રાતારમપરં હરિઃ ।
સ્વયમેવાંશરૂપેણ પાલયત્યખિલં જગત્ ॥ ૭૮૨॥

અહિર્બુધ્ન્યસંહિતાયાં સૃષ્ટિરેવં પ્રદર્શિતા ।
સમષ્ટિસૃષ્ટિરણ્ડાન્તા રામેણાદ્વારકા કૃતા ॥ ૭૮૩॥

બ્રહ્માદિદ્વારકા ચાથ વ્યષ્ટિસૃષ્ટિર્વિનિર્મિતા ।
અસન્દિગ્ધો જગત્સ્રષ્ટા શ્રીરામસ્તદ્ બુધૈર્મતઃ ॥ ૭૮૪॥

નિયમેન નિયામ્યં યદ્ દ્રવ્યં તુ ચેતનેન હિ ।
ચેતનસ્ય તુ તસ્યાત્ર શરીર તત્ પ્રકીર્ત્તિતમ્ ॥ ૭૮૫॥

દ્રવ્યમીશેશબુદ્ધિભ્યાં ભિન્નં શરીરમીરિતમ્ ।
તટસ્થં લક્ષણ ચૈતચ્છરીરસ્ય મતં બુધૈઃ ॥ ૭૮૬॥

નિત્યાનિત્યત્વભેદેન શરીરં દ્વિવિધં મતમ્ ।
પ્રકૃતિશ્ચ તથા કાલો જીવો શુભાશ્રયસ્તથા ॥ ૭૮૭॥

એતાનીશશરાણિ નિત્યત્વેન મતાનિ હિ ।
કર્માકર્મકૃતત્વાભ્યામનિત્યં દ્વિવિધં સ્મૃતમ્ ॥ ૭૮૮॥

આદ્યં ચ દ્વિવિધં કર્મસઙ્કલ્પજં ચ કર્મજમ્ ।
સૌભરિપ્રભૃતેશ્ચાદ્યમન્ત્યમન્યશરીરિણામ્ ॥ ૭૮૯॥

અન્ત્યં સર્વેશ્વરસ્યાત્ર મદાદિકમીરિતમ્ ।
યાનિ ચ નિત્યમુક્તૈસ્તુ સ્વેચ્છયા સ્વીકૃતાનિ હિ ॥ ૭૯૦॥

સ્થાવરં જઙ્ગમં ચેતિભેદાચ્ચ દ્વિવિધં પુનઃ ।
શિલાવૃક્ષાદયસ્તત્ર ચાદિમં સમ્મતં બુધૈઃ ॥ ૭૯૧॥

અન્તિમં તુ ચતુર્ધાઽથ વિદ્વદ્ભિઃ સમ્પ્રકીર્ત્તિતમ્ ।
નરનારકિભેદાચ્ચ તિર્યગ્દેવવિભેદતઃ ॥ ૭૯૨॥

યોનિજાયોનિજત્વાભ્યાં શરીરં દ્વિવિધં પુનઃ ।
યોનિજમસ્મદાદીનાં દ્રૌપદ્યાદેરયોનિજમ્ ॥ ૭૯૩॥

ઉદ્ભિજ્જાદિવિભેદાચ્ચ શરીરં હિ ચતુર્વિધમ્ ।
ઉદ્ભિજ્જં શાખિનાં તત્ર યૂકાદીનાં તુ સ્વેદજમ્ ॥ ૭૯૪॥

અણ્ડજં ભુજગાદીનામસ્મદાદેર્જરાયુજમ્ ।
શરીરં વેદિતવ્યં હિ દેહતત્ત્વબુભુત્સુભિઃ ॥ ૭૯૫॥

પઞ્ચતન્માત્રસાહાય્યાદહઙ્કારાચ્ચ સાત્વિકાત્ ।
શ્રોત્રાદિકં સમુત્પન્નં જ્ઞાનેન્દ્રિયં તુ પઞ્ચ હિ ॥ ૭૯૬॥

દ્રવ્યં તદિન્દ્રિયં બોધ્યં દેહપ્રાણેતરચ્ચ યત્ ।
આત્મપ્રયત્નજાતસ્ય વ્યાપારસ્યાશ્રયસ્તથા ॥ ૭૯૭॥

પ્રાકૃતાપ્રાકૃતત્વાભ્યમિન્દ્રિયં દ્વિવિધં મતમ્ ।
શૂન્યં રજસ્તમોભ્યાં યચ્ચાપ્રાકૃતં તદિન્દ્રિયમ્ ॥ ૭૯૮॥

તદ્ભિન્નં પ્રાકૃતં વેદ્યમિન્દ્રિયં હિ બુભુત્સુભિઃ ।
જ્ઞાનકર્મેન્દ્રિયત્વાભ્યામિન્દ્રિયં દ્વિવિધં પુનઃ ॥ ૭૯૯॥

મનઃસૃષ્ટિસ્તુ જાતા હિ કેવલાત્ સાત્વિકાદિહ્ ।
પ્રોક્તં જ્ઞાનેન્દ્રિયત્વં ચ મનસસ્તત્ત્વવેદિભિઃ ॥ ૮૦૦॥

યદા પઞ્ચાવતિષ્ઠન્તે જ્ઞાનાનિ મનસા સહ ।
જ્ઞાનેન્દ્રિયં મનશ્ચૈવં પાઠાજ્ જ્ઞાનેન્દ્રિયૈઃ સહ ॥ ૮૦૧॥

જ્ઞાનપ્રસરણે શક્તમિન્દ્રિયં જ્ઞાનસંજ્ઞકમ્ ।
હૃદયસ્થં મનસ્તત્ર શ્રોત્રં કર્ણવિહાયસિ ॥ ૮૦૨॥

ભુજગાનાં તુ નેત્રે તત્ સર્વદેહે ત્વગિન્દ્રિયમ્ ।
ચક્ષુસ્તુ કૃષ્ણાતારાગ્રે જિહ્વાગ્રે રસનં સ્થિતમ્ ॥ ૮૦૩॥

ઘ્રાણેન્દ્રિયં તુ નાસાયા અગ્રભાગે હિ તિષ્ઠતિ ।
એવં જ્ઞાનેન્દ્રિયં ષોઢા સમ્પ્રોક્તં તત્વચિન્તકૈઃ ॥ ૮૦૪॥

ગ્રાહ્યા અર્થાસ્ત્વિન્દ્રિયાણાં વિષયા સમ્મતા બુધૈઃ ।
એષાં સંયોગતશ્ચાથ સંયુક્તાશ્રયણાદ્ ગ્રહઃ ॥ ૮૦૫॥

શબ્દઃ શ્રોત્રં તથા ખાદિત્રયમાકાશસમ્ભવમ્ ।
વાયોઃ સ્પર્શસ્તથા ચેષ્ટા ત્વક્ચૈવ તૃતયં સ્મૃતમ્ ॥ ૮૦૬॥

ઇત્યાદૌત્વિન્દ્રિયાણાં ચ ભૌતિકત્વં ન સમ્મતમ્ ।
કિન્તુ ભૂતેષુ તેષાં હિ પોષકતા સમીરિતા ॥ ૮૦૭॥

શ્રુતાવાપોમયઃ પ્રાણઃ એવં પોષકતા જલે ।
પ્રાણસ્ય જલકાર્યત્વમન્યથા સમ્ભવેદિહ ॥ ૮૦૮॥

આપ્યાયન્તે ચ તે નિત્યં તદ્રવસ્થૈસ્તુ પઞ્ચભિઃ ।
ભૂતેષુ પોષકત્વં હિ મોક્ષધર્મે તતસ્ત્વિતિ ॥ ૮૦૯॥

શ્રોત્રાદીન્દ્રિયસાહાય્યાદહઙ્કારાચ્ચ સાત્વિકાત્ ।
વાગાદિકં સમુત્પન્નં કર્મેન્દ્રિયં ચ પઞ્ચ હિ ॥ ૮૧૦॥

ઉચ્ચારણાદિહેતુસ્તુ કર્મેન્દ્રિયં મતં બુધૈઃ ।
અઙ્ગુલ્યગ્રે સ્થિતઃ પાણિઃ શુણ્ડવૃત્તિઃ સ હસ્તિનઃ ॥ ૮૧૧॥

પક્ષ્યાદેરથ પક્ષાદૌ પાદે પાદેન્દ્રિયં સ્થિતમ્ ।
મેહનાદાવુપસ્થશ્ચ પાયુર્ગુદે હિ સંસ્થિતઃ ॥ ૮૧૨॥

માન્થાલાદેર્મુખાદૌ હિ પાયુશ્ચ સંસ્થિતસ્તથા ।
એકાદશેન્દ્રિયાણ્યસ્મત્સિદ્ધાન્તે સમ્મતાનિ વૈ ॥ ૮૧૩॥

આન્તરબાહ્યભેદાભ્યામિન્દ્રિયં દ્વિવિધં પુનઃ ।
આન્તરં તુ મનસ્તત્ર બાહ્યાનિ ચેતરાણિ હિ ॥ ૮૧૪॥

ઇન્દ્રિયાણાં ચ કથ્યન્તે વિષયા દેવતાસ્તથા ।
અન્તઃકરણભેદાચ્ચ ચત્વારો મન આદયઃ ॥ ૮૧૫॥

સઙ્કલ્પો વિષયશ્ચેન્દ્રો દેવો હિ મનસો મતઃ ।
નિશ્ચયો વિષયો દેવો બુદ્ધેર્મતો બૃહસ્પતિઃ ॥ ૮૧૬॥

ચિન્તનં વિષયો દેવો વાસુદેવો હિ ચેતસઃ ।
વિષયોઽહઙ્કૃતેર્ગર્વો દેવો રુદ્રઃ પ્રકીર્ત્તિતઃ ॥ ૮૧૭॥

શ્રોત્રસ્ય વિષયઃ શબ્દો દેવતા દિક્ પ્રભાષિતા ।
ત્વચશ્ચ વિષયઃ સ્પર્શો દેવશ્ચોક્તઃ સમીરણઃ ॥ ૮૧૮॥

ચક્ષુષો વિષયો રૂપં દેવો સૂર્યઃ સમીરિતઃ ।
વિષયો રસનાયા હિ રસશ્ચ વરુણઃ સુરઃ ॥ ૮૧૯॥

ગન્ધાશ્વિનીકુમારૌ ચ ઘ્રાણસ્ય વિષયામરૌ ।

ભાષણં વિષયો વાચો દેવોऽનલઃ પ્રકીર્ત્તિતઃ ॥ ૮૨૦॥

ગ્રહણં વિષયઃ પાણેર્વિષ્ણુર્દેવઃ પ્રભાષિતઃ ।
ગમનં વિષયશ્ચાથ પાદસ્યેન્દ્રઃ સુરો મતઃ ॥ ૮૨૧॥

પાયોઃ પ્રજાપતિર્દેવો વિષયો મલમુઞ્ચનમ્ ।
ઉપસ્થસ્ય યમો દેવો મૈથુનં વિષયો મતઃ ॥ ૮૨૨॥

દશેમે પુરુષે પ્રાણા આત્મૈકાદશ ચ શ્રુતૌ ।
એકાદશેન્દ્રિયં પ્રોક્તં તતો ન્યૂનં ન ચાધિકમ્ ॥ ૮૨૩॥

ઇન્દ્રિયં પ્રાણવાચ્યં ચાત્રાત્મવાચ્યં મનસ્તથા ।
ઉત્ક્રમણાત્ સમે પ્રાણાશ્ચાણવો ગતિશાલિનઃ ॥ ૮૨૪॥

એતસ્માજ્જાયતે પ્રાણો મનઃ સર્વેન્દ્રિયાણિ ચ ।
ઇત્યેતત્કથનાત્ પ્રાણા અનિત્યા એવ સમ્મતાઃ ॥ ૮૨૫॥

કાલ ઃ

ગુણત્રયેણ હીનો યદ્ દ્રવ્યં કાલો જડઃ સ ચ ।
પ્રાકૃતેષુ ચ કાર્યેષુ રામઃ કાલમપેક્ષતે ॥ ૮૨૬॥

નિત્યધામ્નિ સ સર્વેશઃ કાલં નૈવાવલમ્બતે ।
કાલશ્ચ દ્વિવિધો જ્ઞેયઃ ખણ્ડાખણ્ડવિભેદતઃ ॥ ૮૨૭॥

અન્ત્યો વિભુશ્ચ ભૂતાદિવ્યવહારસ્ય કારણમ્ ।
સામાન્યસ્ય તુ કાર્યસ્યાયં સહકારિકારણમ્ ॥ ૮૨૮॥

નિત્યશ્ચાયં સ્વકાર્યસ્યોપાદાનકારણં મતમ્ ।
નિત્યસ્યાસ્ય વિકારસ્તુ નામાન્તરગ્રહાર્હતા ॥ ૮૨૯॥

અખણ્ડકાલકાર્યસ્તુ ખણ્ડકાલો બુધૈર્મતઃ ।
સ ચાનિત્યો નિમેષાદિતત્તન્નામ્ના પ્રકીર્ત્તિતઃ ॥ ૮૩૦॥

પઞ્ચદશનિમેષૈશ્ચ હ્યેકાકાષ્ઠા મતા બુધૈઃ ।
ત્રિંશતા ચાથ કાષ્ઠાભિઃ કલા ચૈકા મતા તથા ॥ ૮૩૧॥

ત્રિંશતા ચ કલાભિસ્તુ મુહૂર્ત્તં સમ્મતં બુધૈઃ ।
ત્રિંશતા ચ મુહૂર્તૈસ્તુ દિવસો માનવો મતઃ ॥ ૮૩૨॥

પઞ્ચદશદિનૈઃ પક્ષો માસઃ પક્ષદ્વયં સ્મૃતઃ ।
માસદ્વયમૃતુશ્ચૈકશ્ચાયનમૃતવસ્ત્રયઃ ॥ ૮૩૩॥

અયનાભ્યાં તથા દ્વાભ્યાં ચૈકઃ સંવત્સરો મતઃ ।
પિતૃણાં ચ દિનં ચૈકં માસદ્વયં હિ માનવમ્ ॥ ૮૩૪॥

સંવત્સરં મનુષ્યાણાં દેવાનાં હિ દિનં સ્મૃતમ્ ।
અયનમુત્તરં તેષામહશ્ચ સમ્પ્રકીર્ત્તિતમ્ ॥ ૮૩૫॥

દક્ષિણમયનં ચાથ તેષાં રાત્રિઃ સમીરિતા ।
દ્વાદશવર્ષસહસ્રં દેવાનાં તુ ચતુર્યુગમ્ ॥ ૮૩૬॥

ચતુઃસહસ્રવર્ષાણાં તત્ર કૃતયુગં મતમ્ ।
ત્રયં સહસ્રવર્ષાણાં ત્રેતાયુગં સમીરિતમ્ ॥ ૮૩૭॥

દ્વિસહસ્રમિતં વર્ષં દ્વાપરં કથયન્તિ હિ ।
સહસ્રવર્ષસઙ્ખ્યાકં મતં કલયુગં તથા ॥ ૮૩૮॥

પૂર્ણો ધર્મઃ કૃતે યુગે ત્રેતાયાં તુ ત્રિપાત્ સ્મૃતઃ ।
દ્વાપરે સાર્ધપાદોઽથ ચૈકપાદઃ કલૌ તુ સઃ ॥ ૮૩૯॥

દ્વિસહસ્રમિતં વર્ષં સન્ધિશ્ચૈષાં પ્રકીર્ત્તિતા ।
ચતુર્યુગસહસ્રં હિ બ્રહ્મણો દિવસો મતઃ ॥ ૮૪૦॥

તાવત્પ્રમાણિકી રાત્રિર્વિદ્વદ્ભિર્વ્યાહૃતાં તથા ।
ચતુર્દશમિતાઃ કલ્પે મનવો બ્રહ્મણો દિને ॥ ૮૪૧॥

ઇન્દ્રાઃ સપ્તર્ષયશ્ચાથ તાવન્તઃ પરિભાષિતાઃ ।
બ્રહ્મા ચાપિ સ્વમાનેન શતં વર્ષાણિ જીવતિ ॥ ૮૪૨॥

કાલાધીનમદઃ સર્વં તથા ચ પ્રલયત્રયમ્ ।
યોઽયં સન્દૃશ્યતે નૂનં નિત્યં લોકે ક્ષયસ્ત્વિહ ॥ ૮૪૩॥

નિત્યઃ સઙ્કીર્ત્યતે નામ્ના મુનિભિઃ પ્રતિસઞ્ચરઃ ।
બ્રાહ્મો નૈમિત્તિકો નામ કલ્પાન્તે યો ભવિષ્યતિ ॥ ૮૪૪॥

ત્રૈલોક્યસ્યાસ્યઃ કથિતઃ પ્રતિસર્ગો મનીષિભિઃ ।
મહદાદિવિશેષાન્તં યદા સંયાતિ સઙ્ક્ષયમ્ ॥ ૮૪૫॥

પ્રાકૃતઃ પ્રતિસર્ગોઽયં પ્રોચ્યતે કાલચિન્તકૈઃ ।
એવં કૂર્મપુરાણે હિ સમ્પ્રોક્તં પ્રલયત્રયમ્ ॥ ૮૪૬॥

નિત્યધામેતરજ્ જ્ઞાનમજડદ્રવ્યમચેતનમ્ ।

ઘટાદ્યર્થપ્રકાશાનામસાધારણકારણમ્ ॥ ૮૪૭॥

પ્રસૃત્ય ચેદ્રિયદ્વારા દ્રવ્યેણ યુજ્યતે તતઃ ।
ગુણક્રિયાવિશિષ્ટત્વાજ્ જ્ઞાનસ્ય દ્રવ્યતા મતા ॥ ૮૪૮॥

અહં જાનામિ ચેત્યેષા પ્રતીતિર્જાયતે તતઃ ।
અપૃથક્સિદ્ધધર્મશ્ચ જ્ઞાનં જીવપરાત્મનોઃ ॥ ૮૪૯॥

સઙ્કોચં ચ વિકાસં ચ તદાપ્નોતિ યથા પ્રભા ।
નષ્ટોત્પન્નપ્રતીતિસ્તુ જાયતે તત એવ ચ ॥ ૮૫૦॥

જ્ઞાનં સઙ્કુચિતં બદ્ધે વિભુ મુક્તપરેશયોઃ ।
જ્ઞાને દૈવેન સઙ્કોચો દૈવાભાવે વિકાસિતા ॥ ૮૫૧॥

પ્રસૃતત્વં ચ પ્રજ્ઞાયાઃ શ્વેતાશ્વતરસમ્મતમ્ ।
જ્ઞાનાવૃતિશ્ચ ગીતાયામાવૃતં જ્ઞાનમિત્યથ ॥ ૮૫૨॥

સુખરૂપં ચ નિત્યં ચ કાલભિન્નં પરાક્ તથા ।
નિત્યાત્મનો ગુણો જ્ઞાનં સ્વરૂપસ્ય નિરૂપકઃ ॥ ૮૫૩॥

સુષુપ્તૌ તમસાચ્છન્નં તદ્ ભવેત્તુ તિરોહિતમ્ ।
સઙ્કોચશ્ચ વિકાસશ્ચ સર્પકુણ્ડલવત્ ખલુ ॥ ૮૫૪॥

જ્ઞાને સ્વતશ્ચ પ્રામાણ્યમપ્રામાણ્યં પરેણ તુ ।
ધારાવાહિકવિજ્ઞાનમેકમેવ હિ સમ્મતમ્ ॥ ૮૫૫॥

ઉપાધિભેદતો બુદ્ધિઃ સુખદુઃખાદિરૂપિણી ।
જ્ઞાનાવસ્થાવિશેષાશ્ચ ભક્ત્તયાદયઃ પ્રકીર્ત્તિતાઃ ॥ ૮૫૬॥

ભક્તેશ્ચાથ પ્રપત્તેશ્ચ મુક્તિસાધનતા મતા ।
મોક્ષે નૈવ પ્રવર્ત્તન્તે શરીરાત્મત્વવાદિનઃ ॥ ૮૫૭॥

આત્મત્વે ક્ષણિકજ્ઞાને મતે મુક્તૌ તિશ્ચ ન ।
કથં મુક્તૌ પ્રવૃત્તાશ્ચ સ્યુરનેકાન્તવાદિનઃ ॥ ૮૫૮॥

મોક્ષે પાષાણકલ્પે ચ પ્રવૃત્તિઃ સ્યાન્ન કસ્યચિત્ ।
સાઙ્ખ્યમુક્તૌ પ્રવૃત્તિર્ન મુક્તિસમ્બન્ધિસંશયાત્ ॥ ૮૫૯॥

વ્યાવહારિકવાક્યાચ્ચ સત્યાભેદમતિર્ન યત્ ।
પ્રવૃત્તિર્ન ભવેન્મુક્તૌ માયિનાં ચ મતે તતઃ ॥ ૮૬૦॥

એષોણુરાત્મૈષ દ્રષ્ટા ઇત્યાદિશ્રુતિમાનતઃ ।
અણુશ્ચ ચેતનો જીવો દ્રવ્યરૂપો મતો બુધૈઃ ॥ ૮૬૧॥

આત્મા નિષ્ક્રામતીત્યેવમુત્ક્રાન્તિશ્ચાત્મનઃ શ્રુતામ્ ।
ગમનાચ્ચન્દ્રલોકે ચ જીવે ગતિઃ સમીરિતા ॥ ૮૬૨॥

તસ્માલ્લોકાત્ પુનશ્ચૈવમાગતિસ્ત્વાત્મનઃ શ્રુતૌ ।
એવમુત્ક્રાન્તિગત્યાદેર્જીવોઽણુર્મન્યતે બુધૈઃ ॥ ૮૬૩॥

જીવોત્ક્રાન્ત્યાદયો ન સ્યુર્વિભુત્વે સમ્મતે ખલુ ।
ઉત્ક્રાન્તિગત્યાગતીનાં વ્યાસેન સૂત્રિતં તતઃ ॥ ૮૬૪॥

જ્ઞાનસ્યાનન્ત્યતશ્ચૈવ હ્યાનન્ત્યશ્રુતિસઙ્ગતિઃ ।
જ્ઞાનેન ધર્મભૂતેન ભોગશ્ચ સર્વવર્ષ્મણિ ॥ ૮૬૫॥

પ્રભાયા ભિત્તિસમ્બદ્ધાયા યથા દીપધર્મતા ।
જ્ઞાને ભાલાદિસમ્બદ્ધેઽપ્યાત્મસમ્બદ્ધતા તથા ॥ ૮૬૬॥

યોગિનાં બહુદેહાનાં જ્ઞાનેનૈવ ચ ધારણમ્ ।
તત્કારણં તુ બોદ્ધવ્યં યોગબલં હિ યોગિનામ્ ॥ ૮૬૭॥

વિલક્ષણં હિ સંયોગઃ જ્ઞાનપ્રસરણં મતમ્ ।
સુષુપ્તાવનપાયત્વાત્ તત્તદ્દેહધૃતિસ્તતઃ ॥ ૮૬૮॥

વિપ્રકૃષ્ટે પ્રદેશે તુ ભોગોત્પાદઃ કથં નનુ ।
મૈવં યતઃ સ ઉત્પાદો રામેચ્છા દૈવસત્તયા ॥ ૮૬૯॥

ચેતસા વેદિતવ્યઃ ઇત્યેતચ્છ્રુતેઃ પ્રમાણતઃ ।
અણોર્માનસપ્રત્યક્ષં જીવસ્ય ચોપપદ્યતે ॥ ૮૭૦॥

આત્મસુખાદિકાધ્યક્ષે મહત્ત્વં કારણં ન તત્ ।
આત્માણુત્વે તતઃ કાચિદાપત્તિર્વિદ્યતે ન હિ ॥ ૮૭૧॥

હૃદ્યન્તર્જ્યોતિરિત્યેવં હૃત્સ્થો જીવોઽજડઃ શ્રુતૌ ।
ભાલાદિસુખદુઃખે ચ જીવશ્ચાત્રાવગચ્છતિ ॥ ૮૭૨॥

શરીરપરિમાણસ્તજ્જીવઃ સર્વશરીરગઃ ।
જૈના ઇતિ વદન્ત્યત્ર તદ્ વરં ન કુતો યતઃ ॥ ૮૭૩॥

અલ્પદેહે બૃહદ્દેહાત્ પ્રવેશેઽપૂર્ણતાઽઽત્મનઃ ।
યોગિનં પરકાયે ચ પ્રવેશઃ સમ્ભવેન્ન હિ ॥ ૮૭૪॥

સઙ્કોચે ચ વિકાસે તુ સ્યાદાત્મનો વિકારિતા ।
વિકારિત્વાદનિત્યત્વં ઘટવદાત્મનો ભવેત્ ॥ ૮૭૫॥

તથાત્વે કૃતનાશશ્ચાકૃતસ્યાભ્યાગમસ્તથા ।
ભાલાદિસુખદુઃખાદિભાનં જ્ઞાનાન્મતં તતઃ ॥ ૮૭૬॥

સ્થૂલશ્ચાહં હિ ગચ્છામિ પ્રત્યયાચ્ચેતનસ્તનુઃ ।
મૃતે દેહે તુ ચૈતન્યં પ્રાણનિર્ગમનાન્ન હિ ॥ ૮૭૭॥

ઇતિ ચેન્ન વરં ચૈતદ્ વિકલ્પાસહતા યતઃ ।
દેહસ્યાવયવે તચ્ચૈકસ્મિન્ સર્વેષુ વાઽસ્તિ હિ ॥ ૮૭૮॥

નાદ્યઃ પ્રતીયતે યસ્માચ્ચૈતન્યમિતરત્ર ચ ।
બહુચેતનવત્ત્વં સ્યાદન્ત્યે ચૈકતનાવથ ॥ ૮૭૯॥

ઉચ્છેદો વ્યહારસ્ય વૈમત્યે ચ મિથો ભવેત્ ।
હસ્તાદ્યન્યતમોચ્છેદે સ્મૃતેશ્ચાનુપપન્નતા ॥ ૮૮૦॥

સઙ્ઘાતરૂપવત્ત્વાન્નત્વાત્મા તનુર્યથા ઘટઃ ।
દેહસ્યાનાત્મતા સિદ્ધા ચેત્યેવમનુમાનતઃ ॥ ૮૮૧॥

મમ દેહઃ પ્રતીતેશ્ચ નાત્મતા મન્યતે તનોઃ ।
અનિત્યત્વાજ્જડત્વાચ્ચ શરીરસ્યાત્મતા ન હિ ॥ ૮૮૨॥

ઇન્દ્રિયસ્ય ન ચાત્મત્વં મમેન્દ્રિયં પ્રતીતિતઃ ।
જીવત્વં ન ચ નેત્રાદેસ્તચ્છૂન્યે જીવ્યતે યતઃ ॥ ૮૮૩॥

મન એવ મનુષ્યાણાં કારણં બન્ધમોક્ષયોઃ ।
ભોગોપકરણં ચૈવં તસ્માદાત્મા મનો ન હિ ॥ ૮૮૪॥

મમ પ્રાણઃ પ્રતીતેશ્ચ પ્રાણસ્ય ચાત્મતા ન હિ ।
પ્રાણોઽસ્મીતિ શ્રુતૌ ચોક્તઃ પ્રાણદેહી પરેશ્વરઃ ॥ ૮૮૫॥

અહં જાનામિ ચેત્યત્રાહમર્થસ્યાત્મતા ખલુ ।
તસ્ય ધર્મતયા જ્ઞાતે જ્ઞાને સા ન કથઞ્ચન ॥ ૮૮૬॥

અજડજીવજીવત્વં પ્રકૃત્યાદૌ જડે ન ચ ।
અણુજીવસ્ય જીવત્વં વિભાવીશે ન સિધ્યતિ ॥ ૮૮૭॥

તનુ જીવત્વમાપન્નં વિભુ બ્રહ્મ હ્યવિદ્યયા ।

ઇતિ ચેન્ન યતો જીવોઽજન્મા નિત્યઃ શ્રુતૌ શ્રુતઃ ॥ ૮૮૮॥

જન્મમૃત્યૂ કથં સ્યાતામાત્મનો નિત્યતા યદિ ।
સમીચીનં ન ચૈતદ્ધિ કુતશ્ચેદુચ્યતે યતઃ ॥ ૮૮૯॥

દેહાત્મનોશ્ચ સંયોગવિયોગૌ કર્મયોગતઃ ।
જન્માત્મનઃ સ સંયોગો વિયોગો મૃત્યુસંજ્ઞકઃ ॥ ૮૯૦॥

જીવદોષા ન ચૈવં તુ બ્રહ્મણિ સમ્ભવન્તિ હિ ।
જીવબ્રહ્મવિભેદે ન ભેદશ્રુતિવિરોધિતા ॥ ૮૯૧॥

મુક્તાવપિ ચ જીવાત્મા જગદ્વ્યાપારવર્જિતઃ ।
તતો ન શક્યતે વક્તુમભેદો બ્રહ્મજીવયોઃ ॥ ૮૯૨॥

જીવબ્રહ્મવિભેદે નાભેદશ્રુતિવિરોધિતા ।
જીવો બ્રહ્માપૃથક્સિદ્ધસ્તતોઽભેદસ્તયોર્યતઃ ॥ ૮૯૩॥

કપિલસ્ય મતે જીવે સ્વીકૃતા જ્ઞાનમાત્રતા ।
અઙ્ગીકર્ત્તુમશક્યા સા કુતશ્ચેત્ તન્મતે યતઃ ॥ ૮૯૪॥

ઇન્દ્રિયાણાં ચ વૈયર્થ્યં સ્વાપે જ્ઞાનં પ્રસજ્યતે ।
તાર્કિકૈસ્તન્ મતો જીવોઽચિદાગન્તુકબુદ્ધિમાન્ ॥ ૮૯૫॥

તચ્ચ શ્રુતિવિરુદ્ધં હિ વિજ્ઞાનાત્મા શ્રુતિર્યતઃ ।
સ્વેન રૂપેણ કિઞ્ચૈવં મુક્તૌ સ્વંરૂપમાપ્યતે ॥ ૮૯૬॥

મોક્ષે તત્ કઃ પ્રવર્તેત તેષાં પાષાણસન્નિભે ।
તતો જ્ઞાનસ્વરૂપાત્મા વિભુજ્ઞાન ચ તદ્ગુણઃ ॥ ૮૯૭॥

જ્ઞાનસ્વરૂપમત્યન્તં નિર્મલં પરમાર્થતઃ ।
એવં વિષ્ણુપુરાણે હિ જ્ઞાનસ્વરૂપતાત્મનઃ ॥ ૮૯૮॥

મન્તા બોદ્ધેતિ પ્રામાણ્યાજ્ જ્ઞાતા જીવો બુધૈર્મતઃ ।
જ્ઞોઽત એવેતિ સૂત્રં હિ તતો વ્યાસેન સૂત્રિતમ્ ॥ ૮૯૯॥

વિજ્ઞાન યજ્ઞં તનુતે જ્ઞાનોક્તિશ્ચેતિ યાઽઽત્મનઃ ।
વિજ્ઞાનગુણસારત્વાત્ સૂત્રે સા પ્રાજ્ઞવન્ મતા ॥ ૯૦૦॥

નાના જીવા હિ લોકેઽસ્મિન્ રામસ્યાંશાઃ સનાતનાઃ ।
મમૈવાંશો જીવલોકે જીવભૂતઃ સનાતનઃ ॥ ૯૦૧॥

જીવે નિત્યે નિજાંશત્વમેવં ગીતાકૃતેરિતમ્ ।
પ્રભાવતઃ પ્રભાવદ્ધિ જીવેંડશત્વં હિ બ્રહ્મણઃ ॥ ૯૦૨॥

પ્રભાવાનિવ બ્રહ્માંશી જીવાનાં મન્યતે બુધૈઃ ।
ઉચ્યતે ચૈકદેશત્વાદ્ વિશિષ્ટાંશો વિશેષણમ્ ॥ ૯૦૩॥

બ્રહ્મણસ્તુ શરીરત્વાજ્જીવો બ્રહ્મવિશેષણમ્ ।
પ્રાધાન્યાન્ન વિશેષ્યાંશે ચાંશતા પ્રાજ્ઞસમ્મતા ॥ ૯૦૪॥

ન જાયતે શ્રુતૌ ચૈવં નિત્યત્વમાત્મનઃ શ્રુતમ્ ।
સ્તન્યપાનપ્રવૃત્તિર્ન જીવે ચાનિત્યતા યદિ ॥ ૯૦૫॥

જીવાનાં સૃષ્ટિવાદસ્તુ દેહયોગેન નાન્યથા ।
જીવાનાં મૃત્યુવાદોઽપિ જીવ દેહ વિયોગતઃ ॥ ૯૦૬॥

અનાદિકાલતો બદ્ધા જીવા દૈવાખ્યકર્મણા ।
અત્ર કર્માણિ કુર્વન્તિ ભુઞ્જન્તિ તત્ફલાનિ ચ ॥ ૯૦૭॥

બદ્ધાશ્ચ ગુણમય્યા તે દૈવ્યા શ્રીરામમાયયા ।
જ્ઞાનપ્રકાશસઙ્કોચં પ્રાપ્તાશ્ચ પ્રાકૃતા નરાઃ ॥ ૯૦૮॥

વદન્તિ મલિના સ્વાઁશ્ચ સંસારિણોઽજ્ઞતાયુતાન્ ।
નાનાયોનિષુ સઞ્જાતા દેહાત્મભ્રમકારિણઃ ॥ ૯૦૯॥

રામાધીનત્વશૂન્યસ્વ સ્વાતન્ત્ર્યમતિશાલિનઃ ।
ઈશ્વરોઽહમહં ભોગી સિદ્ધોઽહં બલવાનિતિ ॥ ૯૧૦॥

આઢ્યોઽભિજનવાનસ્મિ કોઽન્યોઽસ્તિ સદૃશો મયા ।
યક્ષ્યે દાસ્યામિ મોદિષ્યે ઇત્યજ્ઞાનવિમોહિતાઃ” ॥ ૯૧૧॥

સ્વકર્મણઃ ફલસ્યાથ સ્વતન્ત્રં ચ ફલપ્રદમ્ ।
રામતુલ્યં હિ મન્યન્તે રામભિન્નં સુરાસુરમ્ ॥ ૯૧૨॥

તાપત્રયેણ સન્તપ્તા અનાથા દુઃખિનસ્તતઃ ।
રામાનુકમ્પયા જાતાઃ સત્સઙ્ગરુચયસ્તથા ॥ ૯૧૩॥

સદ્ગુરું ચ પ્રપન્ના યે રામમન્ત્રેણ દીક્ષિતાઃ ।
સ્મરન્તો બ્રહ્મ રામં તે દેહં ત્યક્ત્વાઽર્ચિરાદિના ॥ ૯૧૪॥

રામધામ્નિ ગતાશ્ચાથ શ્રીરામગુણસંયુતાઃ ।
નિત્યાનન્તસુખં પ્રાપ્તા દુઃખમૂલવિવર્જિતાઃ ॥ ૯૧૫॥

રામાનુભવકતીરો ભોગસામ્યં ગતાસ્તથા ।
જ્ઞાનસઙ્કોચશૂન્યાશ્ચ જગદવ્યાપારવર્જિતાઃ ॥ ૯૧૬॥

સર્વલોક સુશ્ચારા રામકૈકર્યકારકા ।
તેષાં મુક્તિમવાપ્તાનાં કર્મબન્ધઃ પુનર્ન હિ ॥ ૯૧૭॥

દુઃખાર્ણ વે નિમજ્જન્તં દૃષ્ટ્વા જીવમહેતુકઃ ।
કરુણાસિન્ધુરામસ્ય જાયતે કોઽપ્યનુગ્રહઃ ॥ ૯૧૮॥

પુણ્યં ભવતિ ચાજ્ઞાતં રામસ્યાનુગ્રહેણ હિ ।
અભાવો જાયતે તસ્માદ્ વિદ્વેષપ્રતિયોગિકઃ ॥ ૯૧૯॥

શ્રીરામરામભક્તાનામાભિમુખ્યસ્ય કારણમ્ ।
તજ્જન્યાદાભિમુખ્યાદ્ધિ જિજ્ઞાસા સમુદેતિ ચ ॥ ૯૨૦॥

સમ્બન્ધિની વિભાગસ્ય સઙ્ગ્રહાસઙ્ગ્રહાઈયો ।
શ્રીમદ્રામસ્ય ભક્તાનાં સંવાદો જાયતે તતઃ ॥ ૯૨૧॥

ભવત્યનન્તરં તસ્માત્ સદાચાર્યસમાશ્રયઃ ।
સદાચાર્યાશ્રયેણાથ હેયોપાદેયનિશ્ચયઃ ॥ ૯૨૨॥

રામેતરાચ્ચ વૈરાગ્યં રામે પ્રીતિશ્ચ જાયતે ।
નિવૃત્તે રામભિન્નાનાં રામપ્રાપ્તેશ્ચ કારણમ્ ॥ ૯૨૩॥

અઙ્ગીકરોતિ તત્પશ્ચાત્ સિદ્ધોપાયશ્ચ ચેતનઃ ।
શ્રીરામપ્રાપ્તયે સોઽથ ત્વરતે ભૃશમુત્સુકઃ ॥ ૯૨૪॥

રામઃ સ્મરતિ તં ચાથ સ્વસમ્પ્રાપ્તિસમુત્સુકમ્ ।
યથા સ્વાસ્યુસ્સુકં વત્સં ધેનુર્વાત્સલ્યવારિધિઃ ॥ ૯૨૫॥

આશ્લિષ્ટે ચ વિનષ્ટે સ્તસ્તતસ્તત્પુણ્યપાપકે ।
ભાગેનાથ વિનષ્ટે સ્તસ્તત્પ્રારબ્ધાત્મકે ચ તે ॥ ૯૨૬॥

મનશ્ચેન્દ્રિયસંયુક્તં પ્રાણેન તસ્ય યુજ્યતે ।
પ્રાણો જીવેન સંયુક્તો ભૂતસૂક્ષ્મૈસ્તુ યુજ્યતે ॥ ૯૨૭॥

સર્વેશ્વરસ્ય રામસ્ય સંસર્ગો જાયતે તતઃ ।
તન્માર્ગસ્ય પ્રકાશોઽથ હાર્દરામાનુકમ્પયા ॥ ૯૨૮॥

નાડ્યા મૂર્ધન્યયા ચાથોકામતિ હૃદયાત્ કિલ ।

શરીરાન્નિર્ગતો ભક્ત ઊર્ધ્વે યાત્યર્ક રશ્મિભિઃ ॥ ૯૨૯॥

નિદાઘે ચોષ્મતાસત્ત્વાન્નિશાયાઞ્ચાપિ રશ્મયઃ ।
અચર્યન્ત્યર્ચિરાદિસ્થં પુમાંસમાતિવાહિકાઃ ॥ ૯૩૦॥

દિનં તત્રાર્ચિષોઽહ્નશ્ચ શુક્લં પક્ષં ચ ગચ્છતિ ।
સમેતિ શુરુપક્ષાત સ ઉત્તરાયણમેવ હિ ॥ ૯૩૧॥

તસ્માત્ સંવત્સરં તસ્માદ્ વાયું વાયોશ્ચ ભાસ્કરમ્ ।
સૂર્યાદ્ વિદ્યું વિધોશ્ચાથ વિદ્યુતં વરુણં તતઃ ॥ ૯૩૨॥

તતશ્ચેન્દ્રં તતો ધાતૃલોકં ગચ્છત્યુપાસકઃ ।
અતિક્રામતિ પશ્ચાદ ભૂમ્યાબાવરણસપ્તકમ્ ॥ ૯૩૩॥

ઉલ્લઙ્ગ્ય પ્રકૃતિં સોઽથ વિરજામવગાહતે ।
તતઃ સૂક્ષ્માચ્છરીરાદ્ધિ વિશ્લષ્ટશ્ચ ભવત્યસૌ ॥ ૯૩૪॥

પ્રાદુર્ભવત્યથો ચાસ્યાનઘત્વાદિગુણાષ્ટકમ્ ।
અમાનવ કરસ્પર્શો ભવત્યસ્ય તતઃ પરમ્ ॥ ૯૩૫॥

શ્રીમદરામસ્ય સઙ્કલ્પાદ્ દિવ્યદેહો ભવત્યસૌ ।
કાલકાલ્યેતરે દિવ્યે દેશે પ્રાપ્તો ભવત્યથ ॥ ૯૩૬॥

સરસ્યૈરમ્મદોયેઽથ દિવ્યે સ્નાનં કરોતિ સઃ ।
ભવત્યનન્તરં ચાસૌ દિવ્યભૂષણભૂષિતઃ ॥ ૯૩૭॥

દિવ્યં ચાથ વિમાનં હિ સમારૂઢો ભવત્યયમ્ ।
તિલ્યારણ્યપ્રવેશોઽસ્ય વિમાનારોહણાદનુ ॥ ૯૩૮॥

અપ્સરોભિશ્ચ દિવ્યૈર્હિ ભવ્યા ચાસ્ય સુસત્કૃતિઃ ।
તિલ્યગન્ધપ્રવેશોઽસ્ય તાદૃશ્યાઃ સત્કૃતેઃ પરમ્ ॥ ૯૩૯॥

તિલ્યગન્ધં પ્રવિશ્યાથ બ્રહ્મગન્ધં વિશત્યયમ્ ।
સમ્પ્રાપ્નોતિ તતશ્ચાયં પ્રાકૃતેતરગોપુરમ્ ॥ ૯૪૦॥

વૈકુણ્ઠનગરસ્યાપ્તિર્ભવત્યસ્ય તતઃ પરમ્ ।
ભવત્યયં ચ તત્ર શ્રીનારાયણાભિનન્દિતઃ ॥ ૯૪૧॥

ગોલોકસ્યાથ સમ્પ્રાપ્તિર્ભવત્યસ્ય મહાત્મનઃ ।
ભવત્યસૌ હિ તત્રાથ શ્રીકૃષ્ણેનાનુમોદિતઃ ॥ ૯૪૨॥

તતઃ સાકેતલોકસ્ય પ્રાપ્નોત્યયં ચ ગોપુરમ્ ।
બ્રહ્મવિષ્ણુમહેશાદ્યૈર્દેવૈઃ સ્તુતં ચ વન્દિતમ્ ॥ ૯૪૩॥

વેદૈર્નિવેદિતં ચાથ શ્રીરામેણાભિનન્દિતમ્ ।
સમૃદ્ધં પરમં દીપ્તં સર્વથા ચાથ સર્વદા ॥ ૯૪૪॥

પરાત્પરમયોધ્યં ચ સુષમાસાગરં શુભમ્ ।
અયોધ્યાનગરં ચાસૌ સમ્પ્રાપ્નોતિ તતઃ પરમ્ ॥ ૯૪૫॥

યત્રાસ્તિ સરયૂ રમ્યા પ્રમોદાખ્યં ચ કાનનમ્ ।
લીલાસ્પદં ચ રામસ્ય રત્નાચલઃ સુશોભિતઃ ॥ ૯૪૬॥

પૂર્વદ્વારે ચ યસ્યાસ્તિ સુગ્રીવો હિ કપીશ્વરઃ ।
દ્વારે તુ પશ્ચિમે શ્રીમાન્ રાક્ષસેન્દ્રો વિભીષણઃ ॥ ૯૪૭॥

ઉત્તરે તુ મહાવીરો, બાલિપુત્રસ્તથાઙ્ગદઃ ।
દક્ષિણે કરુણા-સિન્ધુર્મારુતિશ્ચ મહાબલઃ ॥ ૯૪૮॥

દિવ્યસૂરિસદઃ પ્રત્યુદ્ગચ્છત્યયં સમુત્સુકઃ ।
રાજમાર્ગં તતો યાતિ બ્રહ્મતેજો વિશત્યથ ॥ ૯૪૯॥

દિવ્યસ્ય ગોપુરસ્યાથ પ્રાપ્તિર્ભવતિ ચાસ્ય હિ ।
બ્રહ્મવેશ્મ પ્રવેશોઽથ ભવત્યસ્ય મહાત્મનઃ ॥ ૯૫૦॥

કલ્પવૃક્ષતલે ચાસ્તિ સાકેતે બ્રહ્મવેશ્મનિ ।
સુવર્ણમણ્ડપે યત્ર ભાસુરા રત્નવેદિકા ॥ ૯૫૧॥

રત્નસિંહાસનં યત્ર વર્ત્તતે સૂર્યસન્નિભમ્ ।
વિશાલં કમલં દિવ્યં સહસ્રદલશોભિતમ્ ॥ ૯૫૨॥

અધઃસ્થિતે વિતાનસ્ય તત્ર સિંહાસને વરે ।
આસીનં પરમં રમ્યં શ્રીરામં સીતયા સહ ॥ ૯૫૩॥

દિવ્યાયુધાન્વિતં ચાથ દિવ્યપાર્ષદસંયુતમ્ ।
દિવ્યભૂષણવસ્ત્રૈશ્ચ ભૂષિતં વીક્ષતે હ્યસૌ ॥ ૯૫૪॥

નમસ્કરોતિ સાષ્ટાઙ્ગમભ્યાસં સમુપૈતિ ચ ।
કોઽસિ ત્વમિ તિ પૃષ્ટોઽથ શ્રીરામેણ પરાત્મના ॥ ૯૫૫॥

શેષોઽહં શેષિણો નાથ તન્દૈવ સકલેશિતુઃ ।
ઇત્યેવં નિગદન્તં ચ શ્રીરામઃ કરુણાર્ણવઃ ॥ ૯૫૬॥

સ્વીયોત્સઙ્ગસમારૂઢમાલિઙ્ગ્ય વિદધાતિ હિ ।
સર્વાન્ કામાનવાપ્નોતિ ચાયં રામેણ સહ તતઃ ॥ ૯૫૭॥

ગુણાનાં વિગ્રહાદેશ્ચ સ્વરૂપરૂપયોસ્તથા ।
પ્રત્યક્ષાજ્જાયતે પ્રીતેઃ પ્રકર્ષો હિ તતઃ પરમ્ ॥ ૯૫૮॥

અનેક વિગ્રહાણાં ચ જાયતેઽથ પરિગ્રહઃ ।
કામચારે ચ લોકાનાં સમર્થોઽપિ ભવત્યયમ્ ॥ ૯૫૯॥

અવસ્થાસુ ચ સર્વાસુ સર્વયોર્દેશકાલયોઃ ।
કૈઙ્કર્યેષુ ચ સર્વેષુ યાતિ ચાયં પ્રસન્નતામ્ ॥ ૯૬૦॥

છાન્દોગ્યે મુક્તજીવસ્ય પુનરાવૃત્તિવર્જનાત્ ।
ભગવતાઽપિ ગીતાયાં બોધયતા ધનઞ્જયમ્ ॥ ૯૬૧॥

ભગવન્તમુપેતસ્ય પુનર્જન્મનિષેધનાત્ ।
શ્રીરામં સમવાપ્તોઽયં કર્મયોનિ ન ગચ્છતિ ॥ ૯૬૨॥

આનન્દી નાથ જીવોઽયં રામં પ્રાપ્ય રસાત્મકમ્ ।
સમિચ્છતિ પુનર્જન્મ દુઃખાલયમશાશ્વતમ્ ॥ ૯૬૩॥

સત્યસન્ધઃ પ્રતિશ્રુત્ય પ્રપન્નાયાભયં સ્વયમ્ ।
નિવર્ત્તયેદ્ ભયે નૈનં શ્રીરામઃ શ્રિતવત્સલઃ ॥ ૯૬૪॥

શ્રીરામપદ્ધતૌ ચૈવમર્ચિરાદિકપદ્ધતિઃ ।
શ્રીમદ્રામેશ્વરાર્યેણ સઙ્ક્ષેપેણ હિઃ વર્ણિતા ॥ ૯૬૫॥

બદ્ધમુક્તત્વભેદાભ્યાં જીવા ચૈવં દ્વિધા મતાઃ ।
મુક્તાશ્ચ કર્મણા મુક્તા બદ્ધા બદ્ધાશ્ચ તેન હિ ॥ ૯૬૬॥

કાદાચિત્કાશ્ચ નિત્યાશ્ચ મુક્તભેદો દ્વિધા મતઃ ।
આદિમાઃ પૂર્વમુક્તાશ્ચાન્તિમા બદ્ધાઃ કદાપિ ન ॥ ૯૬૭॥

અણુજીવો મતો જ્ઞાતા “એષ હ દ્રષ્ટે” તિશ્રુતેઃ ।
જ્ઞાતેતિકથનાજ્જીવે કર્ત્તૃત્વમપિ સિદ્ધ્યતિ ॥ ૯૬૮॥

સામાનાધિકરણ્યેન જ્ઞાનકર્તૃત્વયોસ્તતઃ ।
ચેતનોઽહં કરોમી તિપ્રતીતિરુપપદ્યતે ॥ ૯૬૯॥

કર્ત્તૃત્વમાત્મનો ધર્મો ભોક્તાભોગ્યમિ તિશ્રુતેઃ ।

ચેતનસ્યાત્ર કર્તૃત્વં ભોક્તૃત્વે હિ પ્રયોજકમ્ ॥ ૯૭૦॥

અન્યઃ કરોતિ ભુઙ્ક્તેઽન્યઃ કથઞ્ચિન્નોપપદ્યતે ।
પ્રાજ્ઞૈઃ કર્મકર્તૈર્હિ સમ્મતં કર્મણઃ ફલમ્ ॥ ૯૭૧॥

આત્મેન્દ્રિયમનોયુક્તં ભોક્તેત્યાહુર્મનીષિણઃ ।
ઇતિશ્રુતિપ્રમાણત્વાત્ કર્ત્તૃત્વં નાત્મનો નનુ ॥ ૯૭૨॥

કિન્ત્વન્તઃકરણસ્થં તદભ્યસ્તમાત્મનીતિ નુ ।
મૈવં પ્રતીયતેચાત્ર કર્તૃતા મનસો ન યત્ ॥ ૯૭૩॥

કિન્તૂપકરણત્વં વૈ ભોક્તૃત્વે ચાત્મનો મતમ્ ।
અન્યથા ચેન્દ્રિયાદેશ્ચ કર્ત્તત્વં સમ્ભવેત્ ખલુ ॥ ૯૭૪॥

કર્ત્તૃત્વમાત્મનસ્તસ્માન્નૈષા શ્રુતિર્નિષેધતિ ।
કર્ત્તા શાસ્ત્રાર્થવત્ત્વાદ્ વૈ વ્યાસેન સૂત્રિતં તતઃ ॥ ૯૭૫॥

તતશ્ચા હં કરોમી તિપ્રતીતિરુપપદ્યતે ।
યદ્યાત્મનો ન કર્તૃત્વં શાસ્ત્રાણાં વ્યર્થતા ભવેત્ ॥ ૯૭૬॥

હન્તા ચેન્મન્યતે હન્તું હતશ્ચેન્મન્યતે હતમ્ ।
ઉભૌ તૌ ન વિજાનીતો નાયં હન્તિ ન હન્યતે ॥ ૯૭૭॥

નન્વેવં પ્રતિષિદ્ધા ચ હ્યાત્મનો હન્તૃતા શ્રુતૌ ।
ઇતિ ચેન્નાત્મનિત્યત્વાદ્ હન્તૃતા વર્જિતા યતઃ ॥ ૯૭૮॥

પ્રકૃતેઃ ક્રિયમાણાનિ ગુણૈઃ કર્માણિ સર્વશઃ ।
અહઙ્કારવિમુઢાત્મા કર્ત્તાઽહમિતિ મન્યતે ॥ ૯૭૯॥

ઇત્યેવં નનુ ગીતાયાં નિષિદ્ધા કર્ત્તૃતાત્મનઃ ।
મૈવં જીવસ્ય કર્તૃત્વં સાંસારિકપ્રવૃત્તિષુ ॥ ૯૮૦॥

ન સ્વરૂપપ્રયુક્તં હિ ગુણસંસર્ગતો યતઃ ।
ઉદીરિતશ્ચ ગીતાયામુત્તરત્રાયમાશયઃ ॥ ૯૮૧॥

પઞ્ચૈતાનિ મહાબાહો કારણાનિ નિબોધ મે ।
અધિષ્ઠાનં તથા કર્ત્તા કરણં ચ પૃથગ્વિધમ્ ॥ ૯૮૨॥

વિવિધા ચ પૃથક્ ચેષ્ટા દૈવં ચૈવાત્ર પઞ્ચમમ્ ।
શરીરવાઙ્મનોભિર્યત્ કર્મ પ્રારભતે નરઃ ॥ ૯૮૩॥

ન્યાય્યં વા વિપરીત વા પઞ્ચૈતે તસ્ય હેતવઃ ।
તત્રવં સતિ કર્ત્તારમાત્માનં કેવલં તુ યઃ ॥ ૯૮૪॥

પશ્યત્યકૃતબુદ્ધિત્વાન્ન સ પશ્યતિ દુર્મતિઃ ।
પ્રશ્નોપષિદિ કર્ત્તા સ્પષ્ટં જીવઃ સમીરિતઃ ॥ ૯૮૫॥

ગ્રહણસ્ય વિહારસ્ય ચાત્મનઃ કથનાન્તચ્છ્રુતૌ ।
આત્મનશ્ચૈવ કર્તૃત્વં બાદરાયણસમ્મતમ્ ॥ ૯૮૬॥

વિજ્ઞાનં યજ્ઞં તનુતે કર્માણિ તનુતેઽપિ ચ ।
તૈત્તરીયેઽપિ ચેત્યેવં કર્ત્તત્વમાત્મનઃ શ્રુતમ્ ॥ ૯૮૭॥

બુદ્ધેરેવ હિ કર્ત્તત્વં સાઙ્ખ્યાસ્તુ પ્રવદન્તિ હિ ।
સમ્ભવેચ્ચ તથાત્વે તુ બુદ્ધેરેવ હિ ભોક્તૃતા ॥ ૯૮૮॥

કર્તૃત્વે ચ મતે બુદ્ધેઃ સમાધિશ્ચ ભવેન્ન હિ ।
આત્મનઃ કર્તૃતા તસ્માત્ સિદ્ધાન્તે સ્વીકૃત ખ ॥ ૯૮૯॥

તક્ષાવત્ સ્વેચ્છયા ચાત્મા કરોતિ ન કરોતિ ચ ।
જડબુદ્ધેસ્તુ કર્તૃત્વે વ્યવસ્થૈષા ન સમ્ભવેત્ ॥ ૯૯૦॥

ત્વાયત્તં રાઘવાયત્તં વા કર્તૃત્વં કિમાત્મનઃ ।
જીવસ્ય ભોક્તૃતા તસ્માત્ પક્ષશ્ચાદ્યો મનોહરઃ ॥ ૯૯૧॥

વિધિનિષેધશાસ્ત્રાણાં વૈયર્થ્યં ચાન્યથા ભવેત્ ।
પિપ્પલં સ્વાદુ ચાત્તીતિ જીવસ્ય ભોક્તૃતા શ્રુતૌ ॥ ૯૯૨॥

ઇતિ ચેન્ન યતો જીવે રાઘવાધીનકર્તૃતા ।
અન્તઃ પ્રવિષ્ટઃ શાસ્તે" તિ શ્રુતૌ રામો હિ શાસકઃ ॥ ૯૯૩॥

વિધિનિષેધશાસ્ત્રાણાં વૈયર્થ્યં હિ તથા નનુ ।
મૈવં જીવસ્ય યત્નં યદ્ વીક્ષ્ય સ્વાનુમતિં ખલુ ॥ ૯૯૪॥

રામો દત્તે તતો જીવો યોગ્યો વિધિનિષેધયોઃ ।
તથા પ્રવર્ત્તતે ચાથ ફલદાને તુ ચાત્મનઃ ॥ ૯૯૫॥

વૈષમ્યં ચાથ નૈર્ઘૃણ્યં મન્યેતે રાઘવે ન તુ ।
અવોચદ્ ભગવાઁશ્ચૈવં ગીતાયાં સ્વયમેવ હિ ॥ ૯૯૬॥

તેષાં સતતયુક્તાનાં ભજતાં પ્રીતિપૂર્વકમ્ ।
દદામિ બુદ્ધિયોગં તં યેન મામુપયાન્તિ તે ॥ ૯૯૭॥

તાનહં દ્વિષતઃ ક્રૂરાન્ સંસારેષુ નરાધમાન્ ।
ક્ષિપામ્યજસ્રમશુભાનાસુરીષ્વેવ યોનિષુ ॥ ૯૯૮॥

એષ એવ સાધુકર્મે ત્યાદિશ્રુતિપ્રમાણતઃ ।
અખિલં ચાત્મકર્ત્તૃત્વં રામાધીનં હિ મન્યતે ॥ ૯૯૯॥

કર્ત્તૃત્વં રાઘવાધીનં નિર્દોષં શ્રુતિસમ્મતમ્ ।
વિશિષ્ટાદ્વૈતસિદ્ધાન્તે જીવસ્ય મન્યતે તતઃ ॥ ૧૦૦૦॥

શ્રીચિદાનન્દશિષ્યેણ પૂર્ણાનન્દેન ધીમતા ।
શ્રીપ્રમિતાક્ષરાખ્યાયા વૃત્તેઃ સારો વિનિર્મિતઃ ॥ ૧૦૦૧॥

ઇતિ જગદ્ગુરુ શ્રીપૂર્ણાનન્દાચાર્ય સિદ્ધાન્તસાર્વભૌમ વિરચિતઃ
શ્રીબોધાયનમતાદર્શઃ સમ્પૂર્ણઃ ।

Authored by Swami Purnanandacharya, within this essay, the complete elucidation of concepts such as Arthapanchak, Tattvatraya, and Rahasyatraya in the Sri Sampradaya is undertaken by Sri Acharya. It refutes the views of various non-theistic philosophies like Buddhism, Jainism, Prabhakara, and Charvaka. Critiques of some theistic philosophies, including Advaita, are also presented. The nature of surrender (Prapatti) is investigated, and there is an in-depth discussion on the aspects of Bhagavan according to the Pancha Vyuhavada and their various activities. The essay also explores the transcendental nature of Shri Ram and provides a clear understanding of the concept of Prameya (subject of knowledge) and Pramana (means of knowledge). It delves

into the distinctions between the inert and
the sentient, discusses the qualities of
Sattva, and provides a detailed analysis of
Mahat Tatva, Ahamkara, Tanmatras, Mahabhuta,
Akasha, Sharira, Indriya, Kala, and more.

Proofread by Parashara Ranganathan

---

*Shri Bodhayanamatadarshah*
pdf was typeset on January 23, 2024

Please send corrections to *sanskrit@cheerful.com*